रङ्गाभिनन्दनम्

॥ श्रीः ॥

॥ रङ्गाभिनन्दनम् ॥

श्रीरङ्गनाथशर्मणामभिनन्दनसमितिः

नरसिंहराजाकालोनि, बेङ्गलूरु

RANGĀBHINANDANAM Felicitation Volume Published by Vidwan Ranganatha Sharma Abhinandana Samithi, GIPA Premises, Bull Temple Road, Bangalore-560 019 Pages : iv+100
April 1994

© Publisher

Printed at
PRABHA PRINṬING HOUSE
22-A, Dr. D. V. Gundappa Road, Basavanagudi
Bangalore-560 004

सम्पादकीयम्

समादरणीयान् प्रथितयशसो वरीयसो विदुषः श्रीजुषो रङ्गनाथशर्मणः कस्को वा शास्त्रज्ञो न जानीते ? न वाऽऽद्रियते सहृदयलोकः ? न वा सादरं सोत्कण्ठमीक्षते कविजनः ? अनितरसाधारणं हि वैदुष्यममीषां पणिनो युवापत्यस्य शास्त्रे, रसैरार्द्रहृदयं कविकर्मणि। असाधारणी प्रतिभा च भाषान्तरकार्ये। शास्त्रेष्वाहितशेमुषयः, काव्येषु निक्षिप्तमनीषा मनीषिणो ह्येते पण्डितलोकप्रसिद्धामिमा-मुक्तिं सर्वथा स्मारयन्ति 'काव्येषु कोमलधियो वयमेव नान्ये, तर्केषु कर्कशधियो वयमेव नान्ये' इति।

तुष्यति शिवोऽभिषेकेण, प्रीणाति विष्णुरलङ्कारेण आनन्दति च पण्डितः शास्त्रेण। स्पृहयन्ति हि शास्त्ररसिकाः शास्त्रीयेभ्यः प्रबन्धेभ्यः। अतोऽत्र शर्मभिरन्यैर्विद्वद्भि-र्निबद्धं निबन्धजातमेव न्यधायि।

काममस्याभिद्रष्टारः शास्त्रीयेषु विषयेषु बद्धादराः, प्रणेतारश्च शास्त्रग्रन्थानामवश्यमानन्देन वर्धेरन्नित्याशासाना आसते सम्पादकजनाः।

इति निवेदयितारौ,

बुधजनविधेयौ, शर्मणामन्तेवासिनौ

जि. महाबलेश्वरभट्टः, सो. ति. नागराजश्च

विषयानुक्रमणिका

१. सगुणनिर्गुणब्रह्मविचारः—वि० के. नारायणभट्टः 1

२. पूर्वमीमांसायां विधिप्रभेदः—वि० सूर्यनारायणभट्टः 6

३. न्यायसम्मता मनःपरीक्षा—वि० एन्. एस्. रामभद्राचार्यः 12

४. कौण्डभट्टनागेशयोः शाब्दबोधविषये मतभेदः
—डा० रामकृष्णमाचार्यः 20

५. संस्कृतभाषायाः व्यावहारिकीत्वे
पाणिनीयशास्त्रे गमकानि—वि० एन्. रङ्गनाथशर्मा 27

६. रसस्वरूपम्—वि० हेच्. वि. नागराजराव 37

७. साम्प्रदायिकं संस्कृतशिक्षणम्—वि० एन्. रङ्गनाथशर्मा 46

८. लक्ष्मीपुरं श्रीनिवासाचार्याः—वि० के. एस्. वरदाचार्यः 53

९. अद्वैतसिद्धान्ते साधनस्य स्थानम्—वि० कृष्ण जोयिस्, के. 56

१०. निपातघटितवाक्येषु शाब्दबोधविचारः
—वि० एन्. रङ्गनाथशर्मा 66

११. सारस्वताराधनम्—वि० के. एस्. भास्करभट्टः 90

१२. शतृप्रत्ययान्तेषु नुम्व्यवस्था—वि० जि. महाबलेश्वरभट्टः 98

सगुणनिर्गुणब्रह्मविचारः

अस्ति खलु ब्रह्मविचारः श्रुत्यादिषु विहितः। विशेषतो वेदान्तेषु। यथा "ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणाः"। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति।

तच्च ब्रह्म सगुणं निर्गुणं चेति द्विविधं श्रुतिषु स्मृतिषु चोपलभ्यते। सगुणं सप्रपञ्चं, सोपाधिकं, साकारं, सविशेषमिति शब्दाः प्रायः पर्यायाः। एवं निर्गुणं, निष्प्रपञ्चं, निरुपाधिकं, निराकारं, निर्विशेषमिति च पर्याया एव। उक्तं हि शंकरभगवत्पादैः आनन्दमयाधिकरणभाष्ये— "द्विरूपं हि ब्रह्मावगम्यते, नामरूपविकारभेदोपाधिविशिष्टं, तद्विपरीतं च सर्वोपाधि-विवर्जितं" इति। "ब्रह्मणो द्विरूपतां दर्शयन्ति वेदान्तवाक्यानि" इति च।

तत्र काश्चन श्रुतयः ब्रह्मणः सगुणत्वं प्रतिपादयन्ति। यथा—सर्वं खल्विदं ब्रह्मेत्युक्त्वा "मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः"। "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते"। "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च"। "एष सर्वेश्वर एष भूताधिपतिरेष भूतपालक एष सेतुर्विधरण एषां लोकानामसंभेदाय"। "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्त-र्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्" इत्याद्याः। तथा कविं पुराणमनुशासितारमित्यादिभगवद्गीतावाक्यानि च सगुणतां ब्रह्मणो बोधयन्ति।

एवमपराः काश्चन श्रुतयः ब्रह्मणो निर्गुणत्वं प्रतिपादयन्ति। यथा— "स होवाचैतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घ-मलोहितमच्छायमतमोवाय्वनाकाशमसंगमरसमचक्षुष्कमश्रोत्रमवागमनोऽते-जस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति कश्चन न तदश्नाति

किञ्चन"। "अथात आदेशो नेति नेति"। "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्ण-मचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूत-योनिं परिपश्यन्ति धीराः"। "नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्"। "अदृष्टमव्यवहार्यमग्राह्यमलक्षणमव्यप-देश्यमचिन्त्यमेकात्मप्रत्ययसारं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः"। "एको देवः . . . साक्षी चेता केवलो निर्गुणश्च" इत्याद्याः। तथा—निर्गुणं गुणभोक्तृ च। अनादित्वात् निर्गुणत्वात् परमात्मायमव्यय इत्यादीनि गीतावाक्यानि च ब्रह्मणो निर्गुणतां प्रति-पादयन्ति। एवं श्रुत्यादिभ्यः ब्रह्मणः द्वैरूप्ये अवगम्यमाने किं वस्तुतो द्विरूपमेव ब्रह्म प्रतिपत्तव्यं उतैकरूपम्। एकरूपत्वेऽपि किं सगुणं उत निर्गुणमिति विशये—यथाश्रुति ब्रह्म द्विरूपमेवावगन्तव्यम्। अलौकिकमर्थं श्रुतिर्यथा यथा बोधयति तथा तथैव सोऽर्थोऽवगन्तव्यः। अन्यथा श्रुतेरप्रामाण्यप्रसङ्गः। न चायमिष्टो वेदविदाम्। तस्मान्नरसिंहवत्सगुणं निर्गुणं चेत्युभयरूपमेव ब्रह्म प्रत्येतव्यमिति केचिदुत्तानमतयो वदन्ति।

अन्ये तु न द्विरूपं ब्रह्म नरसिंहवद्भवितुमर्हति। सगुणत्वनिर्गुणत्वयोरेकत्र विरोधात्। नहि भवति पुष्पं गन्धवद्गन्धरहितं च। तस्माद्भावा-भावयोरेकत्र विरोधान्न ब्रह्मण एकस्य सगुणत्वनिर्गुणत्वे संभवतः। नर-सिंहस्य तु शरीरभागभेदेन भावरूपनराकारता सिंहाकारता चेत्येते न विरुध्येते। श्रुतिरपि विरुद्धरूपद्वयवत्त्वमेकस्य ब्रह्मणो बोधयन्ती न प्रमाण-तामश्नुवीत। न ह्यग्निरुष्णोऽनुष्णश्चेति बोधयद्वचनं प्रामाण्यं प्रतिलभते। ततश्च श्रुतिप्रामाण्यमभिलषता न ब्रह्मणो द्वैरूप्यप्रत्याशा कर्तव्या। अङ्गी-कार्या चैकरूपता। तत्र च सगुणत्वमेव स्वीकार्यम्। बह्वीषु श्रुतिषु स्मृतिषु च सगुणस्यैव ब्रह्मणः प्रतिपादनात्। स च परमात्मा निखिल-दोषवर्जितः अशेषकल्याणगुणवांश्च। "निरवद्यो निरनिष्टः"। "निरवद्यं निरञ्जनं शुद्धमपापविद्धम्"। "बृहन्तो ह्यस्मिन् गुणाः"। "परास्य शक्ति-

र्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च"। "सत्यकामः सत्यसंकल्प" इत्यादिश्रुतेः। तथा—मय्यनन्तगुणेऽनन्ते। "ब्रह्मेशानादिभिर्देवैः समेतैर्यद्गुणांशकः। नावसाययितुं शक्यो व्याचक्षाणैश्च सर्वदा" इत्यादिस्मृतेश्च।

ब्रह्मसूत्रेष्वपि 'अन्तस्तद्धर्मोपदेशात्' इत्यत्र हिरण्यश्मश्रुत्वादेः पापोद्गतत्वलोककामेशितृत्वादिधर्माणां 'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्' इत्यत्र सर्वनियन्तृत्वधर्मस्य 'सर्वधर्मोपपत्तेश्च' इत्यत्र सर्वज्ञत्वसर्वशक्तित्वादिधर्माणामुक्तत्वात्।

शंकरभगवत्पादैरपि गीताभाष्ये—स भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्नः इति वदद्भिः गुणवत्त्वमङ्गीकृतम्। मध्वरामानुजाचार्यैस्तु पुनरुपेत्य गुणवत्वं समर्थितं च।

कथं तर्हि—'साक्षी चेता केवलो निर्गुणश्च' इति श्रुतिः, 'अनादित्वान्निर्गुणत्वात्परमात्मायमव्यय' इत्यादि स्मृतिश्च संगच्छेतेति चेत् निर्गुणमिति पदस्य निरवद्यं निरञ्जनमित्यादिश्रुत्यनुरोधेन हेयगुणराहित्ये तात्पर्यस्य वर्णनात्। तस्मात् दोषगन्धानागन्धितं अखिलकल्याणगुणगणभूषितं ब्रह्म स्वीकर्तव्यम्। तदेव च वेदान्तवेद्यं स्मृतिपुराणादिप्रतिपाद्यं वेदान्ततात्पर्यनिर्णायकसूत्रकृतो भगवतो बादरायणस्याप्यभिमतमिति वदन्ति।

नेदं परे अङ्गीकुर्वन्ति। तात्पर्यानुरोधी हि श्रुत्यर्थो ग्राह्यः। तात्पर्यं च श्रुतीनां अद्वितीये निर्गुणे ब्रह्मणि तात्पर्यलिङ्गैरुपक्रमोपसंहारैकरूप्यादिभिरवगम्यते। सन्ति च सर्वाण्यपि लिङ्गानि छान्दोग्यषष्ठाध्याये अद्वितीयसद्विषयकाणि। तथा हि—'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति अद्वितीयसता उपक्रमः। 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इति चोपसंहारः अद्वितीयात्मपर इति उपक्रमोपसंहारयोरैकरूप्यम्।

*

'ऐतदात्म्यमिदं सर्वम्' इति नवकृत्वोऽभ्यासः। अद्वितीयात्मतत्त्वस्य प्रमाणान्तरेणानधिगतत्वादपूर्वत्वम् । 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य' इति अद्वितीयब्रह्मज्ञानस्य मुक्तिरूपं फलम् । येनाश्रुतं श्रुतं भवतीत्यादिरर्थवादः । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । एवं सोम्य स आदेशो भवति' इत्युपपत्तिश्चेति । गुणवत्त्वस्याङ्गीकारे स्वगतभेदप्रसक्त्या अद्वितीयत्वभङ्गः प्रसज्येत । स्पष्टं च गुणराहित्यं 'साक्षी चेता केवलो निर्गुणश्च' इति श्रुतिर्बोधयति । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतिश्च त्रिविधपरिच्छेद-रहितताम् । वदति च 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ, अमृतस्यैष सेतुः' इति श्रुतिः निर्विशेषात्मज्ञानस्य कैवल्यहेतुताम् । निन्दन्ति च 'उदरमन्तरं कुरुते । अथ तस्य भयं भवति' इत्यादिश्रुतयः भयहेतुत्वादिवर्णनेन भेदज्ञानम् । प्रदर्शिताश्च बह्व्यः श्रुतयः आदौ निर्विशेषत्वबोधिकाः । कथं तर्हि सगुणश्रुतयः स्मृतयश्चोपपद्ये-रन्निति चेत् , उच्यते—वस्तुनो द्वैरूप्यस्य पारमार्थिकस्यासम्भवात् सगुण-श्रुतय उपासनापेक्षितकल्पितगुणवद्ब्रह्मपराः । तथा च तासां न गुणेषु तात्पर्यम् । अतो न ब्रह्मणः ताभिर्गुणवत्त्वसिद्धिप्रसङ्गः । उक्तं हि कल्पतरौ अन्तरधिकरणे—

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥
वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ॥ इति ।

कल्पितत्वेऽपि गुणानां व्यावहारिकत्वात् न फलाभावप्रसङ्गः । सूत्राणि धर्मवत्त्वांशे पूर्वं प्रदर्शितानि न पारमार्थिकधर्माभिप्रायाणि इति न तद्विरोधः । किंच सूत्रकृतैव 'न स्थानतोऽपि' इति सूत्रे उपाधितोऽपि ब्रह्मणो न सविशेषत्वनिर्विशेषत्वयोः संभवः । अतः सर्वत्र श्रुतिषु

निर्विशेषत्वस्य प्रतिपादनात् निर्विशेषत्वेन स्वीकार्यमित्युक्त्वा सविशेषत्व-प्रतिपादकश्रुतोनामपि सत्त्वात् कथं निर्विशेषत्वमेव स्वीक्रियत इत्याशंक्य 'अरूपवदेव हि तत्प्रधानत्वात्' इति सूत्रे निर्गुणे ब्रह्मणि तात्पर्यवतोनां अर्थान्तरे तात्पर्यमुपवर्णयितुमशक्यानां बह्वीनां श्रुतोनां सत्त्वात् ब्रह्म निर्गुण-मेवेत्यवधारयितव्यमिति प्रतिपादितम्। 'दर्शयति चाथो अपि स्मर्यते' इति सूत्रे 'द्वे वाव ब्रह्मणो रूपे' इत्यादिश्रुतेः, अथात आदेशो नेति नेति इति निषेधापेक्षितनिषेध्यसमर्पकत्वेन निषेधश्रुतिशेषत्वं इत्युक्तम्। न सत्तन्ना-सदुच्यत इति गीतास्मृतिरपि निर्विशेषत्वमेव बोधयति इति, विश्वरूपधरो नारायणः नारदं प्रति "माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्व-भूत गुणैर्युक्तं मैवं मां ज्ञातुमर्हसि" इत्यनेन सगुणस्वरूपं मायिकमिति वदतीति चोक्तम्। निर्गुणवाक्यानां प्राकृतहेयगुणराहित्यबोधकत्वाङ्गीकारे लक्षणापत्तिः, बहुश्रुतिविरोधश्च। भगवत्पादैरपि न स्थानतोऽपीति सूत्रस्य भाष्ये समस्तविशेषरहितं निर्विकल्पकमेव ब्रह्म प्रतिपत्तव्यं न तद्विपरीतमिति स्पष्टमुक्तम्। अतो गीताभाष्यवचनं कल्पितगुणपरमिति सिध्यति। श्रीमध्वरामानुजाचार्ययोरभिप्रायस्तु नादरणोयः। उक्तरोत्या श्रुत्यादि विरोधात्।

ततश्च सगुणश्रुतोनां उपासनाप्रकरणस्थानां उपास्यकल्पितगुणसमर्प-कत्वं, निर्गुणप्रकरणस्थानां निषेधापेक्षितनिषेध्यसमर्पकत्वमिति वस्तुतो निर्गुणमेव ब्रह्म मुमुक्षुज्ञेयं वेदान्ततात्पर्यविषय इति वेदान्तविदां हृदयहारी पक्ष इति संक्षेपः।

पूर्वमीमांसायां विधिप्रभेदः

श्रीरङ्गराजतनयैरपि यस्य तत्त्वं
व्याख्यातपूर्वमिति यत्कथितं पुनस्तम् ।
श्रीरङ्गनाथविदुषामभिनन्दनार्थं
सूर्याभिधो लिखति वेदविधिप्रभेदम् ॥

अस्ति विधिनामा विदितेतरवेदनरूपो भेदो वेदस्य पौरुषेयान्य-वाक्यात्मकस्य, यद्विचारार्थं प्राचामाचार्याणां बहुधा प्रवृत्तिः प्रमाणलक्षणादिषु सूत्रभाष्यवार्तिककारादीनाम् । तत्र खण्डयतामपि खण्डदेवादीनां ग्रन्थेषु मीमांसकमूर्धन्यपदेन सादरं संस्मृतानां दीक्षितेन्द्राणामपि विधि-रसायने—

'किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले'

इति यत्रावोचि, कथं वा मादृशेन केनचिल्लेखनी कात्स्न्येंन पञ्चषेषु पत्रेषु व्यापारयितुं शक्येति जानन्त्येव विद्वांसो विशेषतः शास्त्रतात्पर्यविदः । तथापि श्रीरङ्गराजप्रीतये श्रीरङ्गराजसून्वादिवचसां सङ्क्षेपणेन श्रीरङ्गनाथ-शर्मपादानामभिनन्दनं स्यादित्ययमुद्यमः ।

(अ) विधित्रयम्

आचार्यैः कुमारिलभट्टपादैस्तन्त्रवार्तिके मन्त्राधिकरणे लक्षणप्रदर्शन-पुरस्सरं विधीनां त्रिविधो भेदः कारिकया समग्राहि—

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते परिसङ्ख्येति गीयते ॥ इति ।

अत्यन्ताप्राप्तार्थप्रापको विधिरपूर्वविधिः, यथा—व्रीहीन्प्रोक्षति (आप. श्रौ. सू. १-१९-१) इति प्रोक्षणविधिः । एतद्विध्यप्रवृत्तिदशायां दार्श-पौर्णमासिकेषु व्रीहिषु प्रोक्षणं न केनचित्प्रमाणेन प्राप्नोति । विधिर्वा

स्यादपूर्वत्वात् (१-२-१९) इत्यादौ महामुनिना जैमिनिना विधिरयं सूचितः, व्याख्यातश्च तत्रभवता भाष्यकारेण 'तथा ह्यपूर्वमर्थं विधास्यति' इत्यादि वाक्यसंदर्भेण ।

पक्षे प्राप्तस्याप्राप्तांशपूरणफलको विधिर्नियमविधिः, यथा-व्रीहीनवहन्ति (आप. श्रौ. सू. १-१९-११) इत्यवघातविधिः । एतद्विधिप्रवृत्त्य-भावेऽपि पुरोडाशार्थेषु व्रीहिषु तुषविमोकार्थं लोकावगतसाधनमवहननं प्राप्यते । किन्तु लौकिकत्वाविशेषान्नखविदलनादिकमपि प्राप्नुयादिति तस्मिन्पक्षेऽप्राप्तोऽवघातो विधिना नियम्यते । 'नियमार्था वा श्रुतिः' (४-२-२४) इत्यादिसूत्रतद्भाष्याभ्यां संगृहीतोऽयं विधिः ।

एकस्मिन्प्रधाने नियतप्राप्तस्य शेषद्वयस्य, एकस्मिन्नङ्गे नियतप्राप्तस्य प्रधानद्वयस्य मध्येऽन्यतरनिवृत्तिफलको विधिः परिसङ्ख्याविधिः, यथा गृहमेधीये 'आज्यभागौ यजति' (तै. ब्रा. १-६-९-२) इति । अति-देशेन गृहमेधीये प्राप्तस्य साज्यभागशेषसमुदायस्य मध्ये शेषान्तरमाज्य-भागाभ्यां भिन्नं निवर्तत इति शेषपरिसङ्ख्याविधिरयम् ।

शेषपरिसङ्ख्यायास्तूदाहरणमग्निचयनप्रकरणे 'इमामगृभ्णन्रशनामृतस्ये-त्यश्वाभिधानीमादत्ते' (तै. सं. ५-१-२-९) इति । एतद्विध्यप्रवृत्ति-दशायां मन्त्रोऽयं लिङ्गादश्वरशनायामिव गर्दभरशनायामपि प्राप्नोतीति तन्निवृत्तिफलकोऽयं विधिः । द्विविधोऽप्ययं परिसङ्ख्याविधिः 'परिसङ्ख्या' (१-२-३४) इत्यादिसूत्रतद्भाष्याभ्यां सूच्यते ।

अत्र नियमविधिस्थले परिसंख्याविधेः, परिसङ्ख्याविधेश्च स्थले नियम-विधेः सद्भावाद्द्विविध एव विधिरस्तु । तथा हि प्रदर्शितोदाहरणेऽवघातेनैव तुषविमोकः कार्यः, अश्वरशनायामेव मन्त्र उच्चारणीय इत्येवकारेण विवरणं तुल्यम् । एकत्र नखविदलनादिनिवृत्तिः, अन्यत्र च गर्दभरशनातो मन्त्रनिवृत्तिरितीतरनिवृत्तिलाभोऽपि समान इत्याक्षेपस्य निवारणमित्थम्—

नियमस्थले नियम एवाप्राप्तांशपूरणरूपः फलम्, विधेयावघातनिष्ठतया शीघ्रोपस्थितिकत्वात् । परिसंख्यास्थले तु निवृत्तिरेव फलम्, उदाहृतमन्त्रस्थल इव नियमस्य फलत्वासम्भवात् । एवकारेण विवरणमपि नियमविधावयोगव्यवच्छेदाय, परिसंख्याविधावन्ययोगव्यवच्छेदार्थमिति ज्ञेयम् । एवं फलतो भेदप्रतिपादनेऽपि पाक्षिकी नियतता च प्राप्तिराक्षेपमन्त्रलिङ्गादिना यावदालोच्यते, तावत्प्रत्यक्षशास्त्रं झटिति प्रवर्तत एवेति वस्तुतः सर्वो विधिरपूर्वविषय एवेति नास्ति विधा विधीनाम् ।

(आ) विधिचतुष्टयम्

पूर्वमीमांसायामेव विधीनां चतुर्धा विभागो दृश्यते—उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिश्चेति । तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः, यथा 'अग्निहोत्रं जुहोति' (तै. सं १-५-९-१) इति । अङ्गाङ्गिसम्बन्धबोधको विधिर्विनियोगविधिः, यथा समिदादिसहकृतेन यजिना भावयेत् इति 'समिधो यजति' (तै. सं. २-६-१-१) इत्यादिवाक्यश्रवणानन्तरमयं यथाप्रमाणं कल्प्यते । अङ्गानां क्रमबोधको विधिः प्रयोगविधिः, यथा—वेदं कृत्वा वेदिं करोति (आप. श्रौ. सू. १-८-१३-२) इति । कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिः यथा—'अग्निहोत्रं जुहुयात्स्वर्गकामः' (मै. उ. ६-३६) इति । अत्रोत्पत्तिविधिर्द्वितीये, विनियोगविधिस्तृतीये, प्रयोगविधिः पञ्चमे अधिकारविधिश्च षष्ठेऽध्याये द्वादशलक्षण्यां निरूप्यत इति तत्तदध्यायदर्शनादवगम्यते ।

सर्वत्रापि विधिनोत्पत्त्यादिचतुष्टयमपि बोध्यते । किन्तु वाक्यानां वैचित्र्यात्सामर्थ्यभेदेन क्वचिदेकं, क्वचिद्द्वे, क्वचित्त्रीणि, क्वचित्सर्वमिति विवेकः । यथा—उद्भिदा यजेत पशुकामः (ता. ब्रा. १-९-७-६) इति

विधिचतुष्टयपरं वचनम्, अन्यतः कस्यचिदलाभात् । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' (आप. श्रौ. सू.) इत्यत्र 'सोमेन यजेत' (आप. श्रौ. सू. ८-२१-२) इत्यत उत्पत्तेर्लाभादवशिष्टत्रितयपरता । दर्शपूर्णमासवाक्ये उत्पत्तिप्रयोगयोरन्यतः सिद्धेरन्यद्वितयपरत्वम् । 'अग्निहोत्रं जुहोति' (तै. सं. १-५-९-१) इत्यत्रोत्पत्तिमात्रपरत्वम्, 'पौर्णमास्या यजेत' इत्यत्र प्रयोगपरत्वमित्यादि विधिविवेके द्रष्टव्यम् ।

अत्र प्राधान्यमुत्पत्तिविधेरेव, अन्यत्त्रयं तदनुपपत्त्या तत्सिद्ध्यर्थं भवति, उत्पत्त्यादिर्विधेरवस्थाभेद इति न्यायरत्नमालायामिव प्रभाकरमतानुयायी तन्त्ररहस्यकारः । अपूर्वविधिरुत्पत्त्यादिभेदेन चतुर्विधः, नियमपरिसङ्ख्या-विधी प्रायेण विनियोगविषयावेवेति चिन्तामणौ विशेषः ।

(इ) विधिषट्कम्, विधिसप्तकम्, विध्यष्टकञ्च

उद्भिदधिकरणे भाट्टदीपिकायां षोढा विधिस्तत्र च पारदौर्बल्यमुपवर्ण्यते—

(१) शुद्धधात्वर्थकरणकभावनाविधिः प्रथमः, यथा— 'अग्निहोत्रं जुहोति' (तै. सं. १-५-९-१) इति । अत्राग्निहोत्राख्यहोमकरणक-भावनाविधानमस्ति ।

(२) अन्योद्देशेन धात्वर्थविधिर्द्वितीयः, यथा— 'अग्निहोत्रं जुहुयात् स्वर्गकामः' (मै. उ ६-३६) इति । अत्रोद्देश्यवाचकपदान्तरसापेक्षत्वा-त्किञ्चिद्दौर्बल्यम् ।

(३) धात्वर्थोद्देशेनान्यकरणकभावनाविधिस्तृतीयः यथा— 'दध्ना जुहोति' (आप. श्रौ. सू. ६-२५) इति । अत्र विधेयताया दधि-निष्ठत्वेन धात्वर्थवृत्तित्वाभावात् पूर्वापेक्षया दौर्बल्यम् ।

(४) अन्योद्देशेनान्यकरणकभावनाविधिश्चतुर्थः, यथा 'दध्नेन्द्रिय-कामस्य जुहुयात्' (तै. ब्रा. २-१-५-३) इति । अत्र धात्वर्थस्य साधुत्वमात्रार्थत्वादुद्देश्यत्वेनाप्यसम्बन्धात्ततोऽपि दौर्बल्यम् ।

(५) गुणविशिष्टधात्वर्थकरणकभावनाविधिः पञ्चमः, यथा— 'सोमेन यजेत' (आप. श्रौ. सू. ८ २१-२) इति। अत्र मत्वर्थलक्षणापूर्वकं विशेषणविधिकल्पनात्ततोऽपि दौर्बल्यम्।

(६) अन्योद्देशेन गुणविशिष्टधात्वर्थकरणकभावनाविधिः षष्ठः, यथा– 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' (तै. सं. २-३-२) इति। अयं सर्वदुर्बलः पूर्वापेक्षया उद्देश्यवाचकपदान्तरसापेक्षत्वात्। विधिषट्क-प्रकारोऽयं तत्र तत्र पूर्वपक्षे सिद्धान्ते चोदाह्रियते।

अस्मिन्विषये प्राचीनानां मतभेदो दृश्यते—तन्मते विधिर्विषयभेदादष्ट-विधः। प्रथम-द्वितीयविधिप्रकारभेदाभावेऽपि, तृतीय-चतुर्थयोरस्ति भेदः। अत्र 'सोमेन यजेत' (आप. श्रौ. सू. ८-२१-२) इति विशिष्ट-धात्वर्थविधिस्तृतीयः, 'दशापवित्रेण ग्रहं सम्मार्ष्टि' इत्यन्योद्देश्यकविशिष्ट-धात्वर्थविधिश्चतुर्थः। नवीनमते यस्तृतीयः, सोऽत्र पञ्चमः। धात्वर्थो-द्देशेन विशिष्टान्यविधिः षष्ठः, यथा— 'य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा' इति। अत्र यागोद्देशेन विकल्पितपौर्णमास्य-मावास्याविधानम्। धात्वर्थोद्देशेनान्ययोः सम्बन्धविधिः सप्तमः, यथा— 'प्राकाशावध्वर्यवे ददाति' (तै. सं. १-८-१८) इति। अत्र दानोद्देशेन प्राकाशाध्वर्युसम्बन्धो विधीयते। नवीनमते षष्ठोऽत्र चरमो विधिरिति विध्यष्टकपक्षः।

अत्र षष्ठसप्तमविधिप्रकारयोर्भेदाभावात्सप्तविधो विधिरिति भाट्टचिन्ता-मणिकृतां मतम्।

(ई) विधिसाहस्री

प्रकारप्रकारैर्विधयो बहुधा विभक्ताः, येषां नामतोऽपि कथनं वैरस्या-वहमिति सङ्क्षेपेण तदुक्तप्रकारः प्रदर्श्यते—

विधिः प्रत्यक्ष-कल्प्यभेदात्, अर्थकर्म-गुणकर्मभेदाद्वा द्विविधः, अपूर्वा-दिभेदात्त्रिविधः, उत्पत्त्यादिना चतुर्विधः, लिङादिवाचकभेदात्पञ्चविधः,

अध्याहारादिभेदेनार्थवादाधिकरणोक्तप्रकारेण नवविधः, सामान्यविध्यादिभेदादेकादशविधश्च । सर्वेषामवान्तरभेदाः, तेषामपि पुनर्भेदाः तेषामपि तथेत्यादिक्रमेण सहस्रशो भेदा विधीनां मीमांसारसिकैः प्रादर्शिषत । सर्वे च ते भेदा धर्मशास्त्रादौ, आकरे च तत्र तत्र दृश्यन्ते ।

एवं प्राधान्येन चतुर्धा विधिनिरूपणस्य सत्त्वेऽपि विधित्रयं विधिचतुष्टयञ्च मीमांसायामन्यत्र च प्रसिद्धम् । विधिषट्कादिनिरूपणं तु मीमांसायामपि प्रकरणग्रन्थेषु नोल्लिखितमिति न तथा प्रसिद्धम् । प्रकाशकृतां निरूपणं सर्वथाऽप्रसिद्धमिति वक्तुं शक्यते । एतद्व्यतिरेकेणापि परिभाषादौ प्रकारान्तरेण गुणविध्यादिप्रकारो न्यरूपि । आम्नायस्य क्रियार्थतया, क्रियायाश्च लौकिकभिन्नाया विधिपरतन्त्रतया, विधेश्च सपरिकरस्य निरूपणार्थमेव भगवती पूर्वमीमांसा प्रवृत्तेति तं सामस्त्येन सङ्ग्रहीतुं विधिरेव प्रभवतीति शम् ।

'न हि शब्दाः क्रियन्ते, प्रयुक्तानामिदमन्वाख्यानम्' इति महाभाष्यकारस्य स्फुटोक्तिः, ग्रामवाचकानां निरुक्तिः, 'प्राच्येषु, उदीच्येषु कम्बोजेषु' इत्यादिना देशभेदात् शब्दस्वरूपस्य अर्थस्य च भेदप्रदर्शनं संस्कृतभाषायाः स्वाभाविकत्वं व्यवहारगोचरत्वञ्च स्फुटयति ।

कर्णाटकादिदेशभाषासमुदयमाप्याययन्ती, भरतखण्डस्याखण्डतां समानरूपेण शिष्टाचारेण चिन्तनप्रकारेण च वज्रलेपेनेव घटयन्ती विराजते सनातनी सुरसरस्वती ।

संस्कृतभाषाध्ययनेनैव कन्नडभाषायाः पुष्टिस्तुष्टिश्च, नो चेन्महती विनष्टिरिति तु दृढं मन्यामहे । तस्मात्—

मातृवद् भगिनीवच्च या नः पुष्णाति मातरम् ।
गैर्वाण्यपि च सा जीयादित्येवास्माकमाशयः ॥

—रं.श.

न्यायसम्मता मनःपरीक्षा

॥ ॐ नमो न्यायदर्शनप्रवर्तकेभ्योऽक्षपादादिभ्यो महद्भ्यः ॥

मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ।
तस्मान्मनःपरीक्षेयं क्रियते न्यायसम्मता ॥

मनो नाम किञ्चिदस्ति ? न वा ? इति विप्रतिपत्तिः परीहार्येति मनः परीक्ष्यते । दृष्टे सम्भवत्युपाये अदृष्टोपायकल्पनाया अन्याय्यत्वात्, इन्द्रियैरितरैः दृष्टैः दृष्टसदृशैरपि वा, मनसा कल्पनीयेन निर्वाह्यः सर्वो व्यवहारो निरुह्यताम्, को नाम मनःकल्पनेन विशिष्टो लाभः ? येन मनःकल्पनस्यागतार्थता स्यात् । आबालगोपालम् आपामरपण्डितञ्च अविप्रत्तिपत्तेः, मनःकल्पनमवर्जनीयं खलु ! 'मम मनस्येवमासीत्' इति सर्वोऽप्यविशेषेणप्रत्येति व्यवहरति च यतः, प्रतीतिव्यवहाराभ्यामेव चार्थसिद्धिः लोकशास्त्रसंमता च यस्मात्, तस्मात् मनोऽविगीतमिति, का नाम विप्रतिपत्तिर्मनसि ? यतस्तस्य परीक्षणमावश्यकं भवेत् ।

लोकवत् गतानुगतिकतया यत्किंचिदर्थाभ्युपगमो हि अविवेकफलः, न पर्यवस्येत् पारमार्थिकतायाम् । स्मृतं खलु— 'गतानुगतिको लोको न लोकः पारमार्थिकः' इति । अपारमार्थिको ह्यर्थो न नाम बाधमतिक्रम्यावतिष्ठेत । रज्जुसर्पव्यवहारः शुक्तिरजतव्यवहारश्च अनतिक्रान्तबाधो दृष्टः, 'नायं सर्पः, किन्तु रज्जुः' 'नेदं रजतं, किन्तु शुक्तिः' इत्येवम् अनुपदमेव बाधदर्शनात् । बाधितप्रतिपत्ति-व्यवहारौ हि कारणदोषाविनाभूतौ सन्तौ, प्रतिपत्तारं व्यवहर्तारं चाप्रामाणिकं दुष्टमापादयत इति, अप्रामाणिकस्य च लौकिकपरीक्षकैर्जनैरविश्वास्यताऽऽपाद्येतेति, नैतौ विस्रम्भणीयौ स्यातामिति च ; विस्रम्भार्हतायै स्वीयः परकीयश्च सर्वः प्रत्ययो व्यवहारश्च परीक्ष्यैव निर्धारितप्रमाणभावः कार्यः सचेतसा । अतो मनः परीक्षणीयमेव ।

ननु-मन्वादीनां सम्प्रतिपन्नविस्रम्भभागिनामृषीणां व्यवहारात् मनसः अबाधिता सिद्धिर्भवेत् । 'एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्' (म. स्मृ. २-९२) इति हि मनोर्भाषितम् ।

सत्यम्! ते हि! आप्तत्वनिश्चयात्परमेव सम्प्रतिपन्नप्रमाणभावा भवेयुः । अन्यथाऽतिप्रसङ्गात् । वेदा अपि आप्तेनोच्चारिताः सन्त एव अबाधितप्रमाणभावाः सम्पन्नाः इति स्थिते, किमुत मन्वादिवाक्यानां प्रमाणत्वे । 'तद्वचनादाम्नायस्य प्रामाण्यम्' इति समानतन्त्रे काणादेऽपि सूत्रम् । अतो मनः परीक्ष्यैव स्वरूपस्वभावाभ्यां निर्णेयं भवति ।

भ्रमो वा विप्रलम्भो वा सर्वत्र सुलभो यतः ।
अतः परीक्ष्याऽभ्युपेत्यं सर्वं तत्त्वार्थलालसैः ॥

आह चात्राक्षपादः— 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्' (न्या. सू १-१-१२) इति । इदं च सूत्रं मनसः प्रमाणसिद्धतां वर्णयति । न हि सर्वमपि प्रत्यक्षैकगम्यं भवितुमर्हति । स्वदेहेऽपि पृष्ठभागस्य अनुमानगम्यतायाः अनपह्नवनीयत्वात् । अतोऽनुमानमपि अर्थप्रमायां साधनमेवेति, मनोविषये अनुमानप्रमाणतायाः प्रतिपादनाय लिङ्गोपन्यासः । लिङ्गं हि नाम लीनमर्थं गमयति । मनश्च लीनम्-तिरोहितस्वरूपम् । अत एव तस्य प्रकाशे गमकापेक्षा । सम्यङ्निरूपितो ह्यर्थः संशयविपर्ययावत्येति । निरूपणं च लक्षणस्वरूपप्रामाण्यविभागानां प्रदर्शनात् । विभिन्ना हि दार्शनिकाः एकैकमप्यर्थं विविधैर्लक्षणादिभिर्निरूपयन्ति । अत एव च अन्यान्यैर्निरूपितं व्यवच्छेत्तुं परीक्षायां प्रयतन्ते । आह च गदाधरभट्टाचार्यः— 'परीक्षा नाम परमतनिराकरणपूर्वकं स्वमतव्यवस्थापनम्' इति । लक्षणं च सप्रयोजनं भवति, इतरव्यावृत्तिसम्पादनेन व्यवहारजननेन च । उक्तं च— 'व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्' इति । न हि गवेतरं गां च अविशेषेण जानन् कश्चन गोस्वरूपज्ञो भवेत् । तथात्वे हि 'गामानये'त्युक्ते

अश्वानयनेनाऽपि कृती भवेत् । अतो गवि अगोव्यावृत्तिरवश्यं ज्ञातव्या । सा च तत्र सास्नावत्त्वज्ञानादेव सम्पन्ना भवतीति, सास्नावत्त्वं गोर्लक्षणं मन्वते परीक्षकाः । तद्वदेवाऽत्र मनः तदितरव्यावृत्तस्वसाधारणधर्मवत्तया ज्ञातं चेत्! ज्ञातं भवेत् । नो चेत् अज्ञातमेव । नहि गां पदार्थतया जानन् यः कोऽपि गोज्ञ इत्युच्येत । उक्तं चाऽत्र लक्षणमन्नंभट्टेन— 'सुखाद्युपलब्धिसाधनम् इन्द्रियं मनः' इति । विश्वनाथपञ्चाननेनाऽपि— 'साक्षात्कारे सुखादीनां करणं मन उच्यते' इत्युक्तम् ।

सुखादीनि च सुख-दुःख-ज्ञान-इच्छा-द्वेषाः प्रयत्नश्च । तेषामेषां गुणभूतानां धर्माणामात्मगतानां उपलम्भः-साक्षात्कारः सर्वानुभवसिद्धः— 'अहं सुखी, अहं दुःखी, अहं जानामि, अहमिच्छामि, अहं द्वेष्मि, अहं प्रयते' इति । अयं च सुखादेरात्मविशेषगुणस्य साक्षात्कारः, करणभूतं किञ्चिदिन्द्रियं विनोत्पत्तुमलम् । तथा हि सति चक्षुरादिकं विनाऽपि रूपाद्युपलम्भसिद्ध्या तेषामप्यनिन्द्रियत्वापातात् । अन्धादिनाऽपि रूपादिग्रहणप्रसङ्गाच्च । अन्धत्वादेः देहविकलतापादकत्वानापत्तेश्च । सिध्यति चानेनैतत्—सुखाद्युपलब्धिः सकरणिका; उपलब्धित्वात् रूपाद्युपलब्धिवत् इत्यनुमानम् । लक्षणं प्रमाणं चेति द्वयमपि लब्धं भवति । 'सुखदुःखादिसाक्षात्कारनिरूपितकरणताशालित्वे सति इन्द्रियत्वम् मनसो लक्षणम्' इति । इन्द्रियत्वमात्रे च लक्षणतया वर्ण्यमाने, चक्षुरादावतिव्यापकं स्यात्तत् । सत्यन्तमात्रं चेन्मनसो लक्षणम्! प्रत्यक्षे विषयस्य कारणतया सुखादौ उपलभ्यमाने विषय एव अतिव्याप्तिः प्रसक्ता स्यादिति, दलद्वयं मिलित्वा, स्वेतरसकलव्यावृत्त्या असाधारणधर्मतां प्रतिपद्यते मनसः । अतिव्याप्तिश्च निवारिता । मनसि अस्य लक्षणस्य अबाधादेव अव्याप्त्यसम्भवौ निरस्तौ भवतः । अतो दूषणत्रयराहित्याच्चास्य लक्षणता निर्बाधा । दूषणत्रयरहितो धर्मो हि लक्षणम् ।

मनसश्चास्य उद्देशः कृतः अक्षपादेन— 'आत्मशरीरेन्द्रियार्थबुद्धि-मनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्' (न्या. सू. १-१-९) इति ।

चक्षुरादीनामितरेषामिन्द्रियाणां देशे एवाऽस्याऽपि पाठो यद्यप्यवसरप्राप्तः ; इन्द्रियत्वसाम्यात्, बाह्यत्वान्तरत्वाभ्यामेव वैषम्यदृष्टेः ; अथाऽपि महतो वैलक्षण्यस्याऽऽविष्करणायैव इन्द्रियप्रकरणमुल्लङ्घ्य मनो निरूपितं सूत्रकारेण । किं नाम तद्वैलक्षण्यम् ? उच्यते— बाह्यानि चक्षुरादीनि खल्विन्द्रियाणि, सिद्धतैजसभावादिना हेतुना भौतिकतां प्राप्तानि—चक्षुः तैजसम्, श्रोत्रं नाभसम्, घ्राणं पार्थिवम्, रसना जलीया, त्वक्च वायवीयेति । तथैव प्रतिनियतविषयाण्यपि— चक्षू रूपस्यैव ग्राहकम्, श्रोत्रं शब्दस्यैव, घ्राणं गन्धस्यैव, रसना रसस्यैव, त्वक् स्पर्शस्यैवेति । अपि च तानि रूपादिगुणवन्त्येवेन्द्रियत्ववन्ति ।

एतत्सर्ववैलक्षण्यं च मनसि । तथा हि ! जाग्रत्सुषुप्तिव्यवस्थायाः अनपलपनीयतया, मनसोऽणुत्वाभावे पुरीतद्देशगमनतदभावयोः असिद्ध्या जाग्रत्सुषुप्त्योरपलापापत्त्यां अणुत्वं-पारिमाण्डल्यपरिमाणत्वं स्वीकार्यमिति, निरवयवत्वत्वाविनाभूतेन चाणुत्वेन कार्यत्वव्यावृत्तौ, भूतारब्धत्वरूपस्य भौतिकत्वस्याऽपि अपास्तत्वेन, भौतिकत्वतदभावाभ्यां मनसः चक्षुरादि-वैलक्षण्यम् ।

तथा— आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षम् इति क्रमात्, सर्वेषां विषयाणां प्रत्यक्षेऽपि मनसः कारणता अपरिहार्या । अत एव हि यत्र मनसः यादृशविषयग्राहीन्द्रियानासङ्गः, तद्विषयाप्रत्यक्षमानुभविकम्— 'अन्यत्रमना अभूवं नाश्रौषम्' इत्यादि-रीत्या । अतो मनसः न प्रतिनियतविषयतेति सिद्धं चक्षुरादि-वैलक्षण्यम् ।

तथैव च यतो मनोऽभौतिकम्, अत एव न सगुणस्येन्द्रियतालाभः भूतसम्बन्धिनां गुणानां मनस्यभावात्। अतोऽस्य पृथक् प्रमेयपाठे पाठः सार्थक एव।

किं च चक्षुरादीनां पञ्चानामपीन्द्रियाणां स्वैःस्वैर्विषयैः साकं संनिकर्षे विद्यमानेऽपि, चाक्षुषादीनि पञ्च ज्ञानानि एकदैव यतो न जायन्ते; तत् किंनिबन्धनम्? इति परिचिन्तने; विषयेन्द्रियसंयोगापेक्षयाऽतिरिक्तमेव किंचिदत्र तेस्तैः सिद्धसंनिकर्षैरिन्द्रियैः संसृष्टं सत् अवर्जनीयकारणभावं निर्णेयमिति, तदेवाऽत्र मनःशब्देन न्यायदर्शने सिद्धान्तितम्। इदमेव चोक्तं सूत्रकारेण-युगपदनुत्पत्तिर्ज्ञानानां मनसोऽनुमापिका भवति—इति।

कथमिदं निश्चेतुं शक्यम्? पञ्च ज्ञानानि युगपन्न भवन्तीति; यतो हि आश्रमवासिनां खल्वध्यापकानां, ज्ञानानामेषां समवायः परिचीयमानोऽवगतः; वेदानधीते, अधीयान एव समित्कुशाद्याहरणाय वनमध्यं व्रजति, अवर्जनीयं कमण्डलुं च हस्ते धारयति, वनगमनाय चक्षुर्व्यापारयति, मृगाणां मृगयूनां च कर्मजान् शब्दान् श्रोत्रेण शृणोति, प्रयाणस्याऽन्तरे एव श्वापदव्याघ्रादीनां गतागतलिङ्गानि च बुभुत्सते च, इति, नानाज्ञानयौगपद्यासंभवेन सर्वेषां क्रमप्रभवत्वे, विच्छिद्येतैकैकमत्रेति, सर्वेषामविच्छेदोपलम्भ एव ज्ञानयौगपद्यगमको भवितुमर्हति इति। तथा च कारणान्तरापेक्षानिरासे मनसोऽपि निरास इति।

अनवहितमनसां नैसर्गिकगतिचिन्तनाकुशलानामिदं चोद्यमिति, नात्र भ्रमितव्यं तत्वबुभुत्सापरैः। शतपत्रपत्रशतभेदने हि सूच्यग्रेण क्रियमाणे, पत्राणां क्रमभावित्वादेव भेदने क्रमिकता-कालपौर्वापर्यं निर्णेयम्। सूक्ष्मस्तु कालः भिन्नोऽप्यभिन्न एव लक्ष्यते। अलातदण्डे हि भ्राम्यमाणे शीघ्रभ्रमणतो निमित्तात् अलातचक्रप्रतिपत्तिर्जायते इति न सा प्रतिपत्तिः प्रमाभूता भवितुमर्हति इत्यवहितैर्भाव्यम्। इदमेव च पण्डितपामरयोर्वैलक्षण्यस्थानम्।

ननु मनसो व्यापकत्वे का वा हानिरापतेत् ? उक्ता खलु हानिः जाग्रत्सुषुप्त्यादिव्यवस्थोच्छेद इति ।

सत्यमुक्ता ; न स्फुटमुक्तेति अनुक्तेव सा ।

उच्यते तर्हि स्पष्टप्रतिपत्त्यर्थं पुनः । यदि नाम भवेन्मनो व्यापकं तदा ज्ञानकारणभूतस्यात्ममनसोः संयोगस्य सदा सत्त्वप्रसङ्गेन, सदैव तत्कार्यस्य ज्ञानस्याऽप्यापत्त्या ज्ञानाभावरूपा सुषुप्त्यवस्था जीवस्य कदाऽपि नैव घटेत । सर्वैस्तदा तदा अनुभूयमाना च सुषुप्तिः, कदाचित् ज्ञानकारणसामग्र्याः वैकल्यमनुमापयति । यदा आत्ममनसोः संयोगो विच्छेदं प्राप्नोति ; ज्ञानकारणसामग्र्या वैकल्येन ज्ञानाजननेन सुषुप्ति-रुपपन्ना भवतीति । चेतन आत्मा विभुः । मनोऽपि यदि विभु ! संयोगस्य नित्यतापत्त्या ज्ञाननित्यता दुर्वारा स्यादिति, मनोऽणुपरिमाणमेव ।

ननु द्वयोर्मध्ये अन्यतरस्यात्मनो विभुत्वमङ्गीकृतमेवेति, मनसः आत्म-संयोगो दुर्वार एवेति, कथमिदं समाधानम् ?

अवहितमनसा श्रोतव्यम्— मनो हि गतिशीलं स्थानात् स्थानान्तर-मटति इति तावत् आदौ चिन्त्यताम् । यदा तु दैहिकीषु विविधासु स्थलीष्वटति तदा, देह एव हृदयदेशसम्बन्धिन्यां पुरीतन्नामिकायां नाड्यां प्रविशति कदाचित् । तदा च मनसः आत्मना सह संयोगः ज्ञानकारण-भूतो विघटितो भवति । पुरीतद्भिन्नदेशावच्छिन्नात्ममनःसंयोगस्यैव अन्वयव्यतिरेकाभ्यां ज्ञानकारणतायाः निश्चयात्—इति ।

मनसो विभुत्वे, विभुद्वयसंयोगोऽप्यवर्जनीयः स्यात् । तथा च सति नित्यसंयोगाभ्युपगमप्रसङ्गेन, 'क्रिया, क्रियातो विभागः, विभागात् पूर्व-संयोगनाशः, ततः उत्तरदेशसंयोगोत्पत्तिः' इत्येवंरूपायाः कार्यकारण-भावव्युत्पत्तेः नैसर्गिक्याः वैघट्यमापद्येतेति च । तस्मात् न विभु मनः ।

ननु तर्हि कालाकाशदिगात्मनां चतुर्णामपि विभुत्वे, तेषां मिथः संयोगः कथं वार्यते ? संयोगाभ्युपगमे च नित्यसंयोगोऽनिवार्यः प्रसज्यते।

नैतद्दोषाय। मिथः संयोगस्यैवानभ्युपगमात्तेषामित्यन्यदेतत्। आत्म मनसोः संयोगस्य कारणत्वं ज्ञानादिकं प्रति स्वीकृतम्। तस्य कादाचित्कत्वं विना कार्यकारणभावस्यैवाऽसिद्धिः स्यात्। अन्यथा कार्योत्पत्तेः सार्वदिकत्वे, नित्यत्वापत्त्या कारणानङ्गीकारादविशेषः स्यादिति, अल मधिकेन।

इदं चेदृशं मनः, एकस्मिन् शरीरे एकमेव विद्यमानं सत्, ज्ञानादेः कारणम्। यदि एकैकस्मिन् शरीरेऽप्यनेकं भवेत्; तदा एकस्य मनसः पुरीतद्देशप्रवेशेऽपि, अपरस्य मनसः तद्भिन्नदेशवर्तित्वसम्भवेन पुरीतद्भिन्नदेशावच्छिन्नात्ममनःसंयोगस्याऽनपायेन, सुषुप्त्यभावः, नैकैर्मनोभिः आत्मसंयुक्तैः संयोगस्य पंचस्वपीन्द्रियेषु सम्भवेन ज्ञानयौगपद्यं च तदवस्थं स्यात्।

मनश्चेदं, क्रियावत्—मूर्तं चाभ्युपगन्तव्यम्; निष्क्रियत्वे स्पन्दाभावेन तैस्तैरिन्द्रियैः सह संयोगाभावप्रसङ्गः; स्थानान्तरसंयोगं प्रति क्रियायाः असमवायिकारणत्वेन, तदभावे सामग्र्यभावात्, संयोगानुदयापत्तिः। मूर्तत्वं च अपकृष्टपरिमाणाश्रयत्वम्। परममहत्परिमाणवति चलनाभावात् क्रियासम्पत्तये मूर्तत्वस्य अपरिहरणीयत्वात्। मूर्तत्वस्य अनित्यत्वेन व्याप्तिराहित्यात्, न नित्यत्वप्रतिघातो मूर्तत्वेनेति नित्यं चैतत्। सावयवत्वे सति मूर्तत्वं, यत्किंचिदाश्रितत्वे सति मूर्तत्वम्—इत्येवम् अनित्यताप्रयोजकं निर्वाच्यम्। अतः मनसो निरवयवत्वात् यत्किंचिदनाश्रितत्वादपि च नानित्यत्वापादनम्।

एतच्च मनः, वेगेन देहान्तरसंचारित्वेन वेगादिगुणयोगात् द्रव्यमपि। साङ्ख्यास्तु— मनसः सात्त्विकाहङ्कारजन्यतामाहुः। उक्तं चेश्वरकृष्णेन— 'सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्' इति।

साङ्ख्योक्तं मनस आहङ्कारिकत्वम्, मनसो नित्यत्वस्थापनेन निरस्तप्रायमिति नाऽत्र वितन्यते ।

एवमेव स्मृतेः, अनुमानस्य, आगमोत्थस्य ज्ञानस्य, संशयस्य, प्रतिभाख्यज्ञानस्य, स्वाप्नमतेः, ऊहस्य, तर्कस्य चेत्येतेषां ज्ञानानां हेतुतया मनसः सिद्धिर्भाव्या ।

जीवनादपि मनसः सिद्धिश्चिन्त्या— विपच्यमानकर्माशयसहितः आत्ममनसोः संयोगस्यैव जीवनरूपत्वात्, मनसोऽत्रावश्यकत्वात् । विरम्यते च कालदौर्लभ्यात् ।

मनोविषये न्यायमञ्जर्यामुक्तं जयन्तभट्टेन—

'विदधत् सुखादिभोगं वहच्च तरलेन्द्रियाश्वसारथिताम् ।
बन्धनिमित्तं मन इति मनस्विभिर्यत्नतो हेयम् ॥'

मोक्षपदार्थभूते एकविंशतेर्दुःखानां ध्वंसे प्रतियोगिभूतं चैतन्मनः अपवर्गापेक्षिभिः हेयतयाऽनुसन्धेयम् । अपवर्गोपयोगि तत्त्वज्ञानं च सम्पाद्यं मनस्सहकारेणैव । इति शम् ॥

[वृत्ता मन परीक्षा]

✱✱✱

सरलीकरणाय यतमानैर्न कदाचिद् व्याकरणशास्त्रमुपेक्षितव्यम् । शब्दानां लिङ्गनियमो वा धातूनामात्मनेपदपरस्मैपदव्यवस्था वा, गणव्यवस्था वा यद्युदस्यते, तर्हि भाषेयं संस्कृतैव न भवति, अपरेयमपभ्रंशभाषा भवेदिति मन्तव्यम् ।

✱✱✱

॥ श्रीगुरुभ्यो नमः ॥

कौण्डभट्टनागेशयोः शाब्दबोधविषये मतभेदः

अस्मिन् लेखे कौण्डभट्टनागेशयोः शाब्दबोधविषये यो मतभेदः स किञ्चिदिव प्रस्तूयते। विदितचरमेवैतत्समेषां शास्त्रज्ञानां यद्भूषणसार-लघुमञ्जूषाग्रन्थौ द्वावेव आर्थिकग्रन्थेषु प्रमाणतया सर्वैः शिरसि धार्येते इति। यतः कौण्डभट्टेन भट्टोजीदीक्षितकारिकाणामेव व्याख्या प्रणीता, अतस्तत्रत्यं मतं भट्टोजीदीक्षितादीनामेवेति प्राचीनानां मतस्य दर्पणः भवति भूषणसारः। तथा च प्राचीनानां नव्यानां (नागेशमारभ्य स्थितानां) च मतभेद एवात्र फलितो भवति।

तत्र प्रथमं धात्वर्थविषये विचारयामः।

"फलव्यापारयोर्धातु"रिति कारिकया धातोः फले व्यापारे च एक-वृन्तगतफलद्वयन्यायेन शक्तिः निरूपिता। तिङन्तस्थले सर्वत्र फलं विशेषणं, व्यापारः विशेष्यमित्यपि प्रतिपादितम्। कृदन्तस्थले तु कर्तृभाव-कृदन्तेष्वेव पूर्वोक्तः विशेषणविशेष्यभावो घटते। कर्मकृदन्ते 'पक्व' इत्यादौ फलव्यापारयोः विशेषणविशेष्यभावव्यत्यासः सर्वैरङ्गीकरणीय एव। "रामेण बाणेन हतो वाली" त्यादौ प्राणवियोगाश्रयो वालीति बोधस्यैव दीक्षितेनाप्यङ्गीकृतत्वात्।

गदाधरेणापि धात्वर्थः एवमेवाङ्गीकृतः। परन्तु कर्मतिङन्तेऽपि फलस्य विशेष्यत्वमभ्युपगतम्। तेन च व्युत्पत्तिवादे पञ्चमीप्रकरणे धातोः फलव्यापारयोः खण्डशः शक्तिरिति मते काचन शङ्कोद्भाविता समाहिता चेत्थम्— "यदि च फलव्यापारयोः शक्तिभेदे एकार्थपरित्यागेनापरार्थ-बोधप्रसङ्गवत्, उक्तरूपसङ्केतोपगमेऽपि पुष्पवन्तपदशक्त्यविशेषेण तत इव सकर्मकधातुतोऽपि विशेष्यविशेषणभावानापन्नस्यैवान्वयबोधः स्यात्,

न तु तदापन्नार्थद्वयविषयक इत्युच्येत तदा सङ्केतस्य बोधांशे विशेषणतया भासमानयोः फलव्यापारविषयकत्वयोः अवच्छेद्यावच्छेदकभावावगाहित्वमपि स्वीकरणीयम्। विशेषणविशेष्यभावेन भासमानयोरेव फलव्यापारयोः विषयताद्वयमवच्छेद्यावच्छेदकभावापन्नमिति तथैव तयोः भानम्। पुष्पवन्तपदसङ्केते च चन्द्रसूर्यविषयतयोः अवच्छेद्यावच्छेदकभावो न भासते, अतस्तयोः विशृङ्खलमेव भानमिति न काप्यनुपपत्ति"रिति।

अस्यायमाशयः। "धातोः फलव्यापारयोः खण्डशः शक्तिरिति मते "धातुः फलविषयकं व्यापारविषयकं च बोधं जनयतु" इत्याकारा ईश्वरेच्छा शक्तिः। सैव सङ्केतः। एवञ्च यथा "पुष्पवन्तपदं सूर्यविषयकं चन्द्रविषयकं च बोधं जनयतु" इत्याकारसङ्केतवता पुष्पवन्तपदेन यथा परस्परमनन्वितयोरेव सूर्यचन्द्रयोर्भानं, तथा फलव्यापारयोरपि परस्परमनन्वितयोरेव भानं स्यात् शाब्दबोधे, नत्ववच्छेद्यावच्छेदकभावेनान्वितयोरिति शङ्कितुः आशयः। अत्रेयं समाहितिः। फलव्यापारयोः खण्डशः शक्तिपक्षेऽपि सङ्केतः "धातुः फलविषयकं व्यापारविषयकं च बोधं जनयतु" इत्याकारो न, किन्तु यगाद्यसमभिव्याहृततिङ्समभिव्याहृतधातुपदं फलविषयकत्वावच्छिन्नव्यापारविषयकताशालिशाब्दबोधं जनयतु" इत्याकारः, यागादिसमभिव्याहृततिङ्समभिव्याहृतं धातुपदं व्यापारविषयकत्वावच्छिन्नफलविषयकताशालिशाब्दबोधं जनयतु" इत्याकारश्च। तस्मात् द्वयोरपि विषयतयोः अवच्छेद्यावच्छेदकभावावगाहित्वेन तथा शाब्दबोधो भवति। पुष्पवन्तपदे तु सङ्केते द्वयोः सूर्यचन्द्रयोः अवच्छेद्यावच्छेदकभावो न भासते। तस्मात् न तत्र विशेषणविशेष्यभावावगाही बोधः" इति। एवञ्च खण्डशः शक्तिपक्षेऽपि कर्तृकर्मतिङ्वैलक्षण्येन अवच्छेद्यावच्छेदकभावावगाही सङ्केतः द्विविधः आवश्यक एव। तादृशसङ्केतद्वयेन बोध्यमानोऽर्थस्तु फलव्यापारोभयरूपत्वेनैवेति अस्य तात्पर्यम्। अयमेवाशयः कौण्डभट्टस्यापि। कर्तृकर्मकृद्वैलक्षण्येन द्विविधस्य सङ्केतस्य

तेनाप्यभ्युपगन्तव्यत्वात् । परन्तु बोधजनकत्वमेव शक्तिरिति यतस्तस्य मतम् अतः "कर्मकृत्समभिव्याहृतं धातुपदं व्यापारविषयकत्वावच्छिन्न-फलविषयकताशालिशाब्दबोधजनकम्" इत्यादिरूपः सङ्केताकारो भवति । तथा च तत्तत्सङ्केते तत्तत्समभिव्याहारस्य कारणत्वं कल्पनीयमेव भवति ।

नागेशस्तु तार्किका इव कर्मतिङन्तेऽपि धातोः फलमुख्यविशेष्यकत्वं "सुप् आत्मनः क्यच्" (पा.सू. ३-१-८) इतिसूत्रस्थं भाष्यं प्रमाणीकृत्याङ्गीकरोति । अवच्छेद्यावच्छेदकभावावगाहिसङ्केतद्वयस्य, तादृशसङ्केतयोः तत्तत्प्रत्ययसमभिव्याहारस्य च कारणताकल्पनापेक्षया फलावच्छिन्नव्यापारे, व्यापारावच्छिन्नफले च धातोः पृथक् शक्तिकल्पनैवोचिता इति तस्याशयः । एवञ्चेत् सङ्केतोऽपि "कर्तृतिङ्समभिव्याहृतं धातुपदं फलावच्छिन्नव्यापारविषयकं बोधं जनयतु" इत्यादिरूपः पूर्वसङ्केतापेक्षया लघुर्भवति । तदुक्तं लघुमञ्जूषायां—"धातोः फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च पृथक् शक्तिद्वयम् । कर्त्राख्यातसमभिव्याहारे भावाख्यातसमभिव्याहारे च फलावच्छिव्यापारस्य, कर्माख्यातसमभिव्याहारे व्यापारावच्छिन्नफलस्य च बोधः । फलव्यापारयोः पृथक् शक्तौ तु तयोरुद्देश्यविधेयभावेनान्वयापत्तिः । किञ्चैकपदे व्युत्पत्तिद्वयकल्पने गौरवम् । तथा हि—फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितेः, व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितेश्च कारणत्वकल्पनं, धातोरर्थद्वये शक्तिकल्पनं, बोधजनकत्वस्य विषयासम्बद्धेऽनुपपत्त्या तत्समभिव्याहारविशिष्टधातौ विशिष्टनिरूपितसम्बन्धद्वयकल्पना चेत्यतिगौरवम् ।" इति । यद्यपि अस्मिन् मते फलव्यापारयोः पदार्थैकदेशत्वेन तत्र द्वितीयाद्यन्तार्थस्य अन्वयासम्भवः "पदार्थः पदार्थेनान्वेति न पदार्थैकदेशेने"ति न्यायात् । तथापि तस्याः व्युत्पत्तेरत्र सङ्कोच इति तस्याशयः ।

२. अथाख्यातार्थे संख्यायाः कुत्रान्वय इत्यत्रास्ति मतभेदः द्वयोः। आख्यातार्थसंख्यायाः आख्यातार्थकर्तृकर्मणोरन्वय इति कौण्डभट्टः। आख्यातार्थसंख्याया अपि स्वप्रकृत्यर्थे एवान्वय इति नागेशः। "गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्" इति न्यायेन गुणभूत-कर्तृकर्मणोः संख्यान्वयः अयुक्तः इति तस्याशयः। क्रियायाः असंख्यात्वात् कथं तत्र संख्यान्वय इति चेत् तत्र साधनगतसंख्यारोपेण। तथा च "तिङर्थप्रकारकबोधे धातुजन्योपस्थितिः कारणम्" इति एक एव कार्यकारणभाव इति लाघवमपि।

३. अथाख्यातार्थः शक्यो वा द्योत्यो वेत्यत्रापि द्वयोरस्ति मतभेदः। आख्यातार्थकर्तृकर्मादिकं वाच्यार्थ इत्येव कौण्डभट्टस्य आशयः। अत एव "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इति न्यायस्य औत्सर्गिकत्वं, भावप्रधानमिति विशेषविधिमाश्रित्य प्रत्ययार्थस्य आख्यातान्तेऽप्राधान्यं च साधितम्। नागेशस्तु तिङर्थस्सर्वोऽपि द्योत्यार्थ एवेति वदति। प्रकृतिप्रत्ययार्थयोरिति न्यायः वाच्यार्थविषयक एव न द्योत्यार्थविषयकः, अत एव स्त्रीप्रत्ययान्तेषु तस्याप्रवृत्तिरिति च तन्मतम्।

४. तथा सकर्मकत्वाकर्मकत्वयोर्विषयेऽपि नागेशः कौण्डभट्टात् पृथक्। फलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वं, फलसमानाधिकरण-व्यापारवाचित्वमकर्मकत्वमिति कौण्डभट्टलक्षणे। नागेशस्तु अन्यथैव ते निर्वक्ति। कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमिति, क्वचिद्व्यापारमात्र-बोधकत्वं चाकर्मकत्वमिति तदाशयः। वैकुण्ठमधिशेते, वैकुण्ठे शेते इत्यनयोरेकार्थत्वेऽपि पूर्वस्मिन् प्रयोगे सकर्मकत्वं, अपरस्मिन् चाकर्मकत्व-मनुभूयते। तथा अस्तीत्यादिषु आत्मधारणरूपव्यापारात् पृथक् फलस्य प्रतीतिरेव नास्ति। अतः सकर्मकाकर्मकत्वे एवमेव निर्वक्तव्ये इति नागेशाशयः।

५. कालश्च क्रियारूप एवेति वर्तमानध्वंसप्रतियोगित्वादिकमेव भूतत्वादिकमिति कौण्डभट्टः। कालः क्रियातः अतिरिक्त एव इति वर्तमानध्वंसप्रतियोगिसमयत्वादिना भूतत्वादिकं परिष्करोति नागेशः।

६. प्रवर्तना च द्वेषाभावसहकृतमिष्टसाधनताज्ञानमिति कौण्डभट्टः। एतच्च प्राचीनमीमांसकानां मतम्। नागेशस्तु नव्यमीमांसकं खण्डदेवमनुकुर्वन् लिङाद्यन्तशब्दप्रयोग एव प्रवर्तना। प्रवर्तनात्वं चाखण्डोपाधिरूपमिति वदति। तत्र खण्डदेवः पूर्वोक्तप्रवर्तनारूपां शाब्दीभावनां तथा आर्थीभावनां च लिङर्थतया स्वीकरोति। नागेशस्तु शाब्दीभावनां लिङर्थतया, आर्थीभावनां तु धात्वर्थतया चाङ्गीकरोति।

७. आश्रयोऽवधिरित्यादिना तत्तत्कारकविभक्तीनाम् आश्रयादिकं, आश्रयत्वादिकं वा अर्थ इति कौण्डभट्टः। नागेशस्तु तत्तत्कारकत्वशक्तिमान्, क्रियाकारकसम्बन्धः, विशेषणत्वं च तत्तत्कारकविभक्त्यर्थ इति वदति।

८. एवं प्रकृतधात्वर्थव्यापाराश्रयत्वं कर्तृत्वमिति कर्तृत्वं परिष्कृतं कौण्डभट्टेन। प्रकृतधात्वर्थत्वेन विवक्षितस्य व्यापारस्य आश्रय एव कर्तेति स्वीकुर्वन्नेव नागेशः "स्वतन्त्रः कर्ते"ति सूत्रानुगुण्येन "तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं, स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं वा स्वातन्त्र्यमिति कर्तृत्वं निरूपयति। अचेतनेषु एतादृशं स्वातन्त्र्यमारोप्यत इति तस्याशयः।

९. एवं कर्मत्वमपि प्रकृतधात्वर्थव्यापारजन्यप्रकृतधात्वर्थफलाश्रयत्वमिति कौण्डभट्टेन परिष्कृतम्। नागेशेन तु "कर्मत्वं व्याकरणशास्त्रबोधितकर्मसंज्ञकत्वम्" इति सामान्यं लक्षणमुक्तम्। ततः ईप्सिततमत्वानीप्सितत्वाकथितत्वादयो लक्षिताः। तत्र ईप्सिततमत्वं च "कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यव्यापारव्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वयोग्यताविशेषशालित्वम्" इति, अनीप्सितत्वं च "कर्तृगतप्रकृतधात्वर्थ-

व्यापारप्रयोज्यव्यापारव्यधिकरणफलाश्रयत्वम्" इति, अकथितत्वं च "कर्मसम्बन्धित्वे सति अपादानादिविशेषाविवक्षितत्वम्" इति च परिष्कृतं तेन ।

१०. एवं लिङ्गस्य शास्त्रीयस्यार्थनिष्ठत्वे पृथक् शास्त्रीये लिङ्गे शक्तिकल्पनागौरवं, पुंलिङ्गश्शब्दः इत्यादिषु आरोपकल्पनागौरवं चेति मनसिकृत्य शास्त्रीयस्य लिङ्गस्य शब्दनिष्ठत्वमेवाङ्गीकरोति कौण्डभट्टः । शब्दस्पर्शरूपरसगन्धादीनामुपचयापचययोरेव भाष्याभिप्रेतत्वात्, तयोः शब्दनिष्ठत्वासम्भवाच्च अर्थनिष्ठमेव लिङ्गं, यत्किञ्चिद्गौरवमस्ति चेदपि अपरिहार्यमेवेति नागेशः ।

११. व्यपेक्षैकार्थीभावावेव क्रमेणाजहत्स्वार्थाजहत्स्वार्थाशब्दाभ्याम् अभिधीयेते इति कौण्डभट्टः । एकार्थीभावस्यैव जहत्स्वार्थाजहत्स्वार्थे द्वौ भेदाविति नागेशः । अनेन एकार्थीभाववादे द्वैविध्यं फलति । तत्र अवयवयोः नैरर्थक्येन विशिष्टशक्त्या विशिष्टार्थबोधनमिति प्रथमः । अवयवार्थान्वितसमुदायार्थस्य विशिष्टशक्त्या बोधनमिति द्वितीयः । अत्र प्रथमपक्षः एक एव एकार्थीभाव इति कौण्डभट्टस्य मतम् । उभयविधोऽपि एकार्थीभावः भवितुमर्हतीति नागेशः । तत्र राजपुरुषादिषु द्वितीयप्रकार एव युक्त इति च तद्धृदयम् । किञ्च समासविग्रहयोः समानार्थत्वं नाम तज्जन्यज्ञानस्य समानविषयकत्वमेव । अतः वृत्तिविग्रहयोः बोधे विशेषणविशेष्यभावव्यत्यासेऽपि न समानार्थत्वहानिरिति कौण्डभट्टः । वृत्त्यर्थविग्रहवाक्येन वृत्त्यर्थमनुसृत्य विशेषणविशेष्यभावव्यत्यासेनैव बोधो जायते इति नागेशः । तथा च नागेशमते कुम्भकार इत्यस्य यो विग्रहः कुम्भं करोतीति, तत्र धात्वर्थमुख्यविशेष्यकबोधो न, किन्तु प्रत्ययार्थकर्तृमुख्यविशेष्यकबोध एव भवति ।

१२. बोधजनकत्वं शक्तिरिति कौण्डभट्टः । वाच्यवाचकभावापरपर्यायसम्बन्धान्तरं शक्तिरिति नागेशः ।

१३. नञर्थः अभावः इति कौण्डभट्टः। आरोपितत्वं नञ्द्योत्यार्थ इति नागेशः। असमस्तनञस्तु अभावार्थकत्वमुभयोरपि सम्मतम्।

१४. उपसर्गाणां निपातानाञ्च द्योतकत्वं वाचकत्वं वा एकमेव स्वीकरणीयम्। केषाञ्चित् द्योतकत्वं केषाञ्चिद्वाचकत्वम् इति तु न युक्तमिति कौण्डभट्टः। उपसर्गाणां, धात्वन्वितसाक्षादित्याद्यव्ययानां च द्योतकत्वमेव। निपातानां विषये तु तत्तत्प्रकरणानुरोधेन केषाञ्चित् द्योतकत्वं केषाञ्चिद्वाचकत्वं चाङ्गीकरणीयमेव। यथा नञः आरोपितत्वं द्योत्यार्थः, अभावश्च वाच्यार्थ इति नागेशः।

एवं प्रधानेषु विषयेषु द्वयोर्मतभेदः दिङ्मात्रमुदाहृतः। विस्तरस्तु तत्तद्ग्रन्थेभ्योऽवगन्तुं शक्यते इत्यलम्।

अहं तु मन्ये सर्वैरपि मठाधिपतिभिरेषा प्रतिज्ञा कर्तव्या यदेकैकस्मिन्नपि मठे अन्यतमस्य शास्त्रस्य सर्वात्मना पोषणं संरक्षणञ्च विधीयत इति।

जगति विद्यमाना सर्वापि भाषा कठिनैवादौ भासते। सर्वत्र व्याकरणाध्ययनमेव परिशुद्धवाक्यप्रयोगे हेतुः। सर्वास्वपि भाषासु व्याकरणं कष्टमेव। विना श्रमं न कश्चिदभ्युदयो लोके दृष्टः।

कौटिल्यस्य अर्थशास्त्रे, शुक्रनीतिसारे, नाट्यशास्त्रे, वास्तुशिल्पग्रन्थे, वैद्यके, पाकशास्त्रे, धर्मशास्त्रे, वात्स्यायनकामसूत्रादिषु च प्रयुक्ता एव सन्ति विभिन्नाः शब्दाः, ये तावदिदानीं व्यवहारपथाल्लुप्ताः। ते च यत्नतः संग्राह्याः।

संस्कृतभाषायाः व्यावहारिकीत्वे पाणिनीयशास्त्रे गमकानि

अथ संस्कृतभाषा कदाचिद्व्यावहारिकी बभूव उत नेति विचार्यते। कुतः पुनरियं विचारणा? अत्र हि विपश्चितो विवदमाना दृश्यन्ते। कदाचिदेषा व्यावहारिकी न बभूव, केवलं पण्डितैः बुद्धिपूर्वं परिकल्पितैषा शास्त्रग्रन्थप्रणयने परमुपयुक्तेति केचित्। यदि व्यावहारिकी तर्हि ब्राह्मणेष्वायत्ता, न त्वन्यैर्व्यवहृतेति च। अद्यत्वे पुनः क्वापि व्यावहारिकी नास्तीत्येतदेव अस्य विवादस्य मूलम्।

लोकव्यवहारगोचरा न बभूवेत्यत्र किं प्रमाणमिति चेत्, उच्यते। या त्वेषा व्यवहारभाषा तस्यां दृश्यमानानि लक्षणानि नात्र संस्कृतभाषायां परिदृश्यन्ते। भाषायाः क्लिष्टत्वात्, व्यवहारेऽदृश्यमानत्वात् नैषा व्यवहारयोग्येदानीमपि। तस्मात्पूर्वमप्येवमेवेति।

अत्रेदं वक्तव्यम्। क्लिष्टत्वं तावदनैकान्तिको हेतुः। अद्यतनीय-व्यवहारोपयुक्तभाषास्वपि क्लिष्टत्वस्य दुरपह्नवत्वात्। या त्वेषा अस्माकं मातृभाषा ययास्माभिर्लीलया व्यवह्रियते, सा भवत्यन्येषां क्लिष्टा। मातृभाषाः समकालवृत्तयोऽन्या अपि भाषा दैनन्दिनिकव्यवहारगोचरा इति भूयसा श्रूयमाणाः सौलभ्यमावहन्ति अध्येतुम्। पाश्चात्त्यानां कर्णाटक-भाषा सर्वथा क्लिष्टा भासते।

कानि पुनः पाणिनीयशास्त्रे सन्ति गमकानि यानि संस्कृतवाण्या व्यावहारिकीत्वं साधयितुमलम्? तान्येव क्रमशो निदर्शयामः। अत्र पाणिनीयशब्देन अष्टाध्यायी, तद्वार्तिकम्, महाभाष्यञ्च विवक्षितम्।

अष्टाध्याय्यां तावदाचार्यः पाणिनिश्छन्दसि भाषायाञ्चेति द्वेधा विभज्य शब्दानन्वाचष्टे। तत्र भाषाशब्देन लौकिकी भाषा गृह्यते। लौकिकी

व्यावहारिकी चेत्ययमर्थः कथं ज्ञायते ? भाष्यकारो हि 'अथ शब्दानुशासनम् ।' केषां शब्दानाम् ? लौकिकानां वैदिकानां चेत्याह । तत्र लौकिकानां वैदिकेभ्यः पृथगुक्तेः लौकिकाः शब्दाः भाषाशब्दा एवेति शक्यविज्ञानम् । लोके विदिता लौकिका इति कैयटः शब्दानां लौकिकत्वं निरवोचत् । तथा च लौकिकत्वं लोकविदितत्वम् । लोकविदितत्वं च शब्दानां भाषाया व्यावहारिकत्वे एव सम्भवतीति ।

इदं सूत्रं परिशील्यताम् । 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ।' (पा. सू. १-४-१०६) अनेन हि सूत्रेण मध्यमोत्तमपुरुषयोर्व्यत्ययं द्वित्वबहुत्वयोरेकवचनं च शास्त्याचार्यः । 'एहि मन्ये ओदनं भोक्ष्यसे' इति, न हि भोक्ष्यसे भुक्तः स अतिथिभिः' 'एहि मन्ये रथेन यास्यसि, न हि यास्यसि यातस्तेन ते पिता'—इत्यादीन्यस्योदाहरणानि । एतानि च जामातरं प्रति श्यालकादेर्वचनानीनि व्याख्यातारः । एष च परिहासः श्यालकादेर्व्यवहारे सम्भवति । न तु शास्त्रादिग्रन्थेषु । अपि च, पुरुषव्यत्ययो वचनव्यत्ययश्च दृश्यते व्यवहारेऽद्यत्वेऽपि कन्नडभाषादिषु परिहासे गम्यमाने । सोऽयं व्यवहारे संरूढोऽर्थ एव सूत्रकारेणानूद्य विधिविषयतां प्रापितः ।

अशूद्रविषयकप्रत्यभिवादे वाक्यस्य टेः प्लुतं शास्त्याचार्यः 'प्रत्यभिवादेऽशूद्रे' (पा. सू. ८-२-८३) इति । प्रत्यभिवादो नाम अभिवाद्यमानस्य गुरोराशीर्वचनम् । 'अभिवादये देवदत्तोऽहम्' इति शिष्योऽभिवादयते । तदा गुरुराशिषं प्रयुङ्क्ते 'आयुष्मानेधि देवदत्त ३' इति । शूद्रविषये तु प्लुतो न भवति । 'अभिवादये तुषजकोऽहं भोः' । तदा गुरोर्वचनं 'कुशल्यसि तुषजक' इति । अनेन प्रत्युदाहरणेन स्फुटं ज्ञायते शूद्रोऽप्यजानात्संस्कृतभाषां, तया च व्यवहरति स्मेति । अत एव सूत्रकारोऽशूद्रे इत्यूचिवान् । किञ्च 'अशूद्रस्त्र्यसूयकेष्विति वाच्यम्' इति अत्रैव

वार्तिकम्। शूद्रे प्रत्युदाहरणमुक्तम्। स्त्रियां तु 'आयुष्मती भव गार्गि' इति। असूयके प्रत्युदाहरणप्रसङ्गे तु भाष्यकारः कञ्चन परिहासप्रसङ्गमुपचिक्षेप। कश्चनासूयकः परिहासार्थमेवं वदति। 'स्थाली अहं भोः' इति। यथाश्रुतग्राही गुरुराह 'आयुष्मानेधि स्थालि३न्' इति। तदा असूयक आह 'नैषा मम संज्ञा स्थाली' इति, दण्डिन्यायेनाहमवोचं 'स्थाली' इति, स्थालीधारी खल्वहमिति। तदा गुरुः प्लुतमकृत्वा 'आयुष्मानेधि स्थालिन्' इत्याशास्ते। अत्र यौगिकशब्दात्प्लुतो न भवतीत्यभिप्रायः। पुनश्चासूयक आह 'स्थालीति मम संज्ञेति'। तदा कुपितो गुरुराह 'असूयकस्त्वमसि जाल्म, न त्वं प्रत्यभिवादनमर्हसि। भिद्यस्व वृषल स्थालिन्' इति। अत्र वृषलशब्दो भर्त्सनायां वृषलसदृश इत्यर्थे प्रयुक्तः। अयञ्च परिहासप्रसङ्गः सर्वथा व्यवहारगोचर एवेति स्फुटं सचेतसाम्। 'भोराजन्यविशां वेति वाच्यम्'' इति वार्तिकेन विज्ञायते राजन्यविशामपि संस्कृताभिज्ञता ववृत इति। दूराद्धूते च, हैहेप्रयोगे हैहयोः, गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् [८-२-८४, ८५, ८६] इति सूत्रत्रय्या उदाहरणान्यपि संस्कृतभाषाया व्यावहारिकत्वे गमकानि। आगच्छ भो माणवक यज्ञदत्त ३ इति यत्र दूरादाह्वानम्, है३ देवदत्त हे ३ देवदत्त दे३वदत्त, देवद३त्त, देवदत्त३ इत्यादीनि हि लोके व्यवह्रियमाणानि वाक्यानि। लोके चाद्यत्वे व्यावहारिकभाषास्वपि दूरादाह्वाने प्लुतो भवति। लोके च त्रिमात्रादधिकमात्रोऽपि स्वरः प्रयुज्यत इत्यन्यदेतत्। अत एव च बोपदेवेन 'आवत् स्वर्धप्लु' इति मुग्धबोधसूत्रवृत्तौ 'त्रिमात्रस्तु प्लुतो ज्ञेयः' इति शिक्षावाक्यमभिलक्ष्य त्रिमात्रपदं बहुमात्रोपलक्षकम् इत्युक्तम्।

एवमेव 'चौर चौर३ घातयिष्यामि त्वाम्' इत्युदाहरणविषयकम् 'आम्रेडितं भर्त्सने [८-२-९५] इति सूत्रं, अङ्ग कूज ३ इदानीं ज्ञास्यसि जाल्म' इत्युदाहरणविषयकं 'अङ्गयुक्तं तिङाकाङ्क्षम्' [८-२-९६] इति सूत्रञ्च दैनन्दिनिकव्यवहारमभिलक्ष्य प्रवृत्ते इति मन्तव्यम्।

एवमसूयासम्मतिकोपकुत्सनेषु 'कन्ये ३ कन्ये' माणवक ३ माणवक' इत्यादौ, आचारोलङ्घने 'स्वयमोदनं भुङ्क्ते ३ उपाध्यायं सक्तून् पाययति' इत्यादौ, प्रैषणे 'यवान् लुनीहि ३ सक्तूंश्च पिब' इत्यादौ च प्लुतविधानं भाषाया व्यावहारिकत्वे लिङ्गम् ।

इदमपरमवधेयं विद्वद्भिः । सर्वास्वपि भाषासु केचन शब्दसन्धानविशेषा वर्तन्ते । ये समाहृत्यार्थविशेषं बोधयन्ति । आङ्ग्लभाषायामयं शब्दसन्धानः IDIOM इति व्यपदिश्यते । It is a form of expression peculiar to a language कन्नडभाषायां ನುಡಿಗಟ್ಟು इति तद्व्यपदेशः । शब्दानामिदं विशिष्टस्वरूपं तत्तद्भाषानियतं द्राघीयसा कालेन समुत्पद्यते भाषासु । पण्डितैरपण्डितैश्च सम्भूय विविधेषु दैनन्दिनिकव्यवहारेषु या भाषा उपयुज्यते तस्यामेवेदं शब्दानां विशिष्टस्वरूपम् उत्पत्तुमर्हति । केवलं पण्डितैरेव शास्त्रे प्रयुज्यमानायां नास्यावकाशः । सन्ति च भूयांसि तादृशशब्दस्वरूपाणि संस्कृतभाषायां यान्यनुशास्त्याचार्यः । तथा हि 'ऊर्यादिच्विडाचश्च' [१-४-६१] [एते क्रियायोगे गतिसंज्ञाः स्युः] ऊरीकृत्य,उररीकृत्य=अङ्गीकृत्येत्यर्थ । मसमसाकरोति । मस्मसाकरोति= हिनस्तीत्यर्थः । गुलुगुधा करोति=पीडयतीत्यर्थः । एवमादयः ऊर्यादौ पठिताः । वार्तिककार आह 'कारिकाशब्दस्योपसङ्ख्यानम्' इति । कारिकाकृत्य=कार्यं निर्वाह्य । एवं कार्यं निर्वाहयतीत्यर्थे कारिकाकरोतीत्यपि ।

'कणेमनसी श्रद्धाप्रतीघाते' (१-४-६६) इत्यपरं सूत्रम् । कणेहत्य पिबति, मनोहत्य पिबति अभिलाषनिवृत्तिपर्यन्तं यथेष्टं पिबतीत्यर्थः । सूक्ष्मो धान्यखण्डः कणः । तस्य कणे इति रूपम् अर्थविशेषश्चेति द्वयं विना रूढिं न प्राप्नोति । एवमन्तर्हत्य मृगं गतो व्याधः=मृगं हत्वा तं परित्यज्य गत इत्यर्थः । मृगमन्तर्हत्वा गतः=मृगं हत्वा तं परिगृह्य गत इत्यर्थः । अयमर्थविशेषः 'अन्तरपरिग्रहे' (१-४ ६५) इति सूत्रेणोपस्थापितः ।

उपाजेकरोति, अन्वाजेकरोति । अनयोर्दुर्बलस्य बलमाधत्त इत्यर्थः । अयमर्थविशेषः 'उपाजेऽन्वाजे' (१-४-७२) इति सूत्रेण सूचितः । उरसिकृत्य, उरसिकृत्वा=अभ्युपगम्येत्यर्थः । मनसिकृत्य, मनसिकृत्वा=निश्चित्येत्यर्थः । इदञ्च 'अनत्याधान उरसिमनसो' (१-४-७४) इति सूत्रेण साधितम् । समानन्यायेन मनसिकरोतीत्यस्य निश्चिनोतीत्यर्थो निर्बाधः । इदञ्चाङ्गलभाषायां विद्यमानं 'To make up one's mind' इति शब्दस्वरूपमनुहरति । रामः सीतां पाणौ करोति, हस्ते करोति=विवहतीत्यर्थः 'नित्यं हस्ते पाणावुपयमने (१-४-७६) इत्यनेन लब्धः । इदञ्च कन्नडभाषायाः ಕೈ ಹಿಡಿಯುತ್ತಾನೆ इति शब्दस्वरूपमनुहरति । प्राध्वंकृत्य=बन्धनेनानुकूलं कृत्वेत्यर्थः । इदञ्च 'प्राध्वं बन्धने (१-४-७७) इति सूत्रेण सिध्यति । अत्रेदं विचारणोयम् । प्रगतः अध्वा प्राध्वः । प्रगतोऽध्वानं वा प्राध्वः । 'उपसर्गादध्वनः' (५-४-८५) इति समासान्तोऽच् । अस्य शब्दस्य बन्धनेनानुकूल्यं कृत्वेत्यर्थः कथं लब्ध इति । विना रूढिविशेषं दुरुपपादोऽयमर्थः । अध्वनि नियुक्तेषु रथादिष्वेवायं प्रयोगः प्रतिबद्धो वा उतान्यत्रापोति न ज्ञायते । व्यवहारस्य लुप्तत्वात् । एवं सन्ति बहवः शब्दाः येषामर्थो न शक्योऽध्यवसातुम् । आचार्यस्तु तत् कण्ठरवेण व्युत्पादयति ।

कृषिगोरक्षवाणिज्यं हि भारतोयानां प्राधान्येन जीविका । तत्र नित्यं व्यापारयतामात्मानं विपुलाः शब्दाः तत्प्रयुक्तव्यवहारगोचरतां भजन्ते । सूक्ष्मार्थविशेषनियतास्तादृशाः शब्दा दर्शनादिशास्त्रेषु नोपयुज्यन्ते । यदि वोपयुज्यन्ते तर्हि क्वचिदेव । संस्कृतभाषायामुपलब्धाः कृष्याद्यर्थविशेषनियतास्तादृशाः शब्दाः साधोयो गमयन्ति संस्कृतस्य व्यवहारविषयताम् ।

इमे शब्दाः परीक्षणीयाः । तिष्ठद्गु, वहद्गु, आयतीगवं, खलेयवम्, लूनयवम्, लूयमानयवम् । एते शब्दाः कृषीवलनिकाये प्रसिद्धा भवितुमर्हन्ति ।

तिष्ठन्ति गावः दोहनार्थं यस्मिन् काले स तिष्ठद्गु दोहनकालः। वहन्ति हलं गावः=बलीवर्दाः यस्मिन् काले सः कालो वहद्गु। आयन्ति गावो गृहं यस्मिन् काले स आयतीगवं कालविशेषः। खलेयवादयः शब्दाः (ಸುಗ್ಗಿ) कालसमुदायविशेषं बोधयन्तीति नातिरोहितं विदुषाम्। सर्वत्र अन्यपदार्थेऽव्ययीभावः। खलेयवादयस्तु खले यवा यस्य स खलेयवं चैत्र इत्यादावपि भवतीति व्याख्यातारः।

इमे विलक्षणाः शब्दा अपण्डितेषु कृषीवलेषु प्रसिद्धाः शिष्टैरपि रूढिवशात् परिगृहीता इति शक्यमध्यवसातुम्। एवमेव शलाकापरि, एकपरीत्यादयः द्यूतकरैः कितवैः प्रयुज्यमानाः साधुत्वेनान्वाख्याताः पाणिनिना। अत एव 'कितवव्यवहारे च' इति वार्तिकं प्रवृत्तम्। उन्मत्तगङ्गं नाम देशः, यत्र गङ्गा उन्मत्तेव प्रवहति। लोहितगङ्गं, शनैर्गङ्गम्—इत्यादयो देशवाचिनो व्यवहारमात्रगोचराः। 'धान्यानां भवने क्षेत्रे खञ्' [५-२-१] मौद्गीनं क्षेत्रम्, व्रैहेयम्, तिल्यम्, तैलीनमित्यादयोऽपि कर्षककुले प्रसिद्धाः शब्दाः। समांसमीना गौः। कन्नडभाषायां ವರ್ಷಗಂಟು इत्युच्यते। अद्य श्वो वा विजयते अद्यश्वीना गौः इत्यादयोऽपि तथैव। मासं भृतः=वेतनेन क्रीतः मासिकः कर्मकरः, षष्टिरात्रेण पच्यमानाः षष्टिकाः=धान्यविशेषाः, इक्षूणां क्षेत्रम् इक्षुशाकटम्, इक्षुशाकिनम् इत्येते ग्राम्यजनेषु प्रसिद्धाः। किञ्चेदं विचारणीयम्। यौगिकाः शब्दाः केचित् दीर्घेण कालेन प्रयुज्यमाना यौगिकत्वं परित्यजन्ति। गोष्ठगोयुगादयः शब्दा यौगिकाः सन्तोऽपि महता कालेन जनैर्व्यवह्रियमाणा यौगिकत्वं परित्यज्य रूढशब्दा इव व्यवतिष्ठन्ते। पश्चाद्यथार्थमजानाना जनास्तानेवार्थान्तरे प्रयुञ्जते। पण्डितैस्तु परिशील्यमाना इमे पुनरुक्ता दुरुक्ताश्च यद्यपि, तथापि भाषायां बहुलं दृश्यमानत्वेन परिगृहीता एव भवन्ति। तथा हि। गोष्ठमिति शब्दः गवां बन्धनस्थाने वर्तते, गावः तिष्ठन्ति अत्रेति व्युत्पत्त्या। पशुपालकैः प्रयुज्यमानोऽयं शब्दः क्रमेण

गवां सम्बन्धं विहाय बन्धनस्थानमित्यर्थे विनियुक्तः । ततश्च पशुविशेषप्रतिपत्तये गोगोष्ठम्, अविगोष्ठम्, महिषीगोष्ठमित्यादयः प्रयोगाः सम्भवन् । तेषां साधुत्वान्वाख्यानाय वार्तिककारः 'गोष्ठादयः स्थानादिषु पशुनामभ्यः' इति वचनमारभमाणो गोष्ठं प्रत्ययमातस्थे । इमे च शब्दाश्चमत्कारमावहन्ति परिशील्यन्ताम्, उष्ट्रगोयुगम् खरगोयुगम् । कृषीवलैः खलु हलकर्षणादिषु गवोर्युगं नियुज्यते सर्वत्र । ततश्च गोयुगशब्दो रूढौ दीर्घेण कालेन केवलं युगमित्यर्थे पर्यवसन्नः । गोशब्दार्थः परित्यक्तः । ततश्च खरगोयुगम्, उष्ट्रगोयुगमित्यादिप्रयोगाः सम्बभूवुः । अत एव वार्तिककारः पश्चात् 'उपमानाद्वा सिद्धम्' इत्यूरोचक्रे । भाष्यकारश्च गवां स्थानं गोष्ठं यथा गवां तद्वदुष्ट्राणामिति । कैयटश्च 'विशेषप्रतिपत्त्यर्थं उष्ट्रादोनामन्यतमेन विशेष्यते । मुख्यगोष्ठप्रतिपत्तये च गोभिरपि गोष्ठस्य विशेषणात् गोगोष्ठमित्यपि भवतीत्याह ।

षण्णां गवां समाहारः षड्गवम् । कालेन च गोपदार्थोऽत्र परित्यक्तः । षण्णां समुदायः षड्गवम् इत्यर्थः प्रतिपन्नः । षड् हस्तिनः इत्यर्थे हस्तिषड्गवम्, षडश्वा इत्यर्थे अश्वषड्गवम् इत्यादयः प्रयोगा रूढिमागताः । एवं तैलशब्दस्य कथापि । तिलस्य विकारस्तैलमिति न्याय्या व्युत्पत्तिः । तिलतैलमिति पुनरुक्तम् । एरण्डतैलम्, इङ्गुदीतैलमिति दुरुक्तम् । तदिदं सर्वं वार्तिककारः 'स्नेहने तैलच्' इति तैलच्प्रत्ययं विदधानः सामञ्जस्यं निनाय ।

एषा च रीतिरन्यास्वपि भाषासु भूयसी समवलोक्यते । उदाहरणार्थं कन्नडभाषायां ಎಣ್ಣೆ शब्दः । ಎಳ್+ನೆಯ್ इति शब्दद्वययोजनेन निष्पन्नोऽयं तैलशब्दसमकक्षः । इदानीं ಎಳ್ಳೆಣ್ಣೆ, ಹರಳೆಣ್ಣೆ, ಕೊಬರಿ ಎಣ್ಣೆ इत्यादयः शब्दाः प्रयुज्यन्ते । ಸೀಮೆ ಎಣ್ಣೆ इत्यपि ।

अत्र तावन्मम विवक्षितमेतावत् । एतादृशाः शब्दाः शब्दार्थव्युत्पत्तिमजानद्भिः दैनन्दिनव्यवहारेषु भृशमुपयुज्यमानाः विकारवैविध्यं प्राप्ता

इत्येव । यदि संस्कृतभाषा कृषीवलादिभिरपि व्यवहारे नोपायोक्ष्यत, तर्हि इमे शब्दा एतादृशं रूपान्तरं नालप्स्यन्तेति ।

अपराणि च भूयांसि सन्ति पदानि येषामात्मलाभो गृहेषु, मित्रगोष्ठीषु, परिहासकथादिषु च सम्भवेत् न तु विद्वत्सभासु, दर्शनादिशास्त्रप्रणयनेषु वा । तेषां पदानां सत्तैव सुष्ठु गमयति संस्कृतभाषाया व्यवहारविषयताम् । तथा हि । पात्रेसमितादिषु पठ्यमानानि सर्वाण्यपि पदान्येतादृशान्येव ।

पात्रेसमितः । यो भोजनकाले सङ्गतः न तु कार्ये स उच्यते पात्रेसमितः, पात्रेबहुलः । कूपमण्डूकशब्दोऽत्रैव पठ्यते । एतदर्थकाः खलु उदुम्बरकृमिः, कूपकच्छपः, अवटकच्छपः, कुम्भमण्डूकः, उदपानमण्डूकः इत्येते शब्दा अत्र सन्ति । परवञ्चनानिपुणो नगरकाकः, स एव नगरवायसः । यो गृहे तिष्ठन् मातरि धृष्टः न तु बहिः, कार्येष्वसमर्थः स मातरिपुरुषः, यो भोजने शूरो न तु कार्ये स पिण्डीशूरः । एवं गेहेशूरः, पितरिपुरुषः, गेहेनर्दी । गेहे स्थित्वा इदं युक्तमिदमयुक्तञ्चेति विमृशति न तु कार्ये स उच्यते गेहेविचितो । अविनीतो धृष्ट उच्यते नगरश्वा इति । यो गृहे एव तिष्ठति कार्यार्थे न बहिर्गच्छति स गेहेमेहो । आजन्म दरिद्रः गर्भतृप्तः । गर्भे एव तृप्तः । गोष्ठेशूरः, गोष्ठविजितीप्रभृतयो निन्दां व्यञ्जयन्ति । यः खलु द्रव्यं नार्जयति आत्मीये गेहे यत्किञ्चिल्लभते तदेव भक्षयति स आखनिकबकः । श्रोतुरुद्वेगजनकं निरर्थकं कर्णे जल्पनं कर्णेटिरिटिरा । सैव कर्णेचुरुचुरा । शब्दद्वयमिदं कन्नडभाषया व्यवह्रियमाणं ಟಿರಿಟಿರಿ, ಚುರುಚುರು शब्दावनुकरोति । एतादृशाः शब्दा भाषायाः सार्वजनीनव्यवहारे एव सम्भवन्तीति नाविदितं विदुषाम् ।

कुतुपो नाम छागरोमजन्मा कम्बलः । सदा तं धारयन् सौश्रुतः कुतुपसौश्रुतः । अजानां क्रयविक्रयं कुर्वन् कश्चित्तौल्वलिः अजातौल्वलिः । शाकपार्थिवत्वादेतादृशाः साधिताः । मयूरव्यंसकादिषु पठ्यमानाश्च शब्दाः

केचित् परीक्षणीयाः। शाकादिकं विक्रेतुं पथि गच्छन् वाणिजो गृहिण्या आहूयते एहिवाणिज इति। तस्या आह्वानमुच्यते 'एहिवाणिजा'। कलहायमानो वाणिजो निष्कास्यते गृहात् सा क्रिया अपेहिवाणिजा। चेलं=वस्त्रमाहरेति वचनमाहरचेला। एवमाहरवसना। उत्पतनिपतेति व्याहारः उत्पतनिपता। स्नात्वापि यस्य देहमालिन्यं न निर्गतं स उच्यते स्नात्वाकालकः। अश्नीत पिबतेति यत्र भोजने आतिथेयेनाभिधीयते सा क्रिया अश्नीतपिबता। एवं पचतभृज्जता, खादतमोदतादयः।

एवमन्येऽपि शब्दाः पाणिनीये व्युत्पादिताः, येषां लोकव्यवहारादेव प्रयोगस्य सम्भवः। कुमारीपुत्रकः, कुमारीश्वशुरक इति शब्दौ लज्जालौ पुरुषे सादृश्यात्प्रयुक्तौ। कुमार्याः पुत्रः कानीनः। स हि स्वभावतो लज्जालुः। यस्य पुत्रः कस्याञ्चन कन्यायामविनीतमाचरितवान् स भवति कुमारीश्वशुरः। पुत्रस्य दुश्चेष्टितेन तस्य लज्जा स्वाभाविकी। तत्सदृशः कुमारीश्वशुरकः। वीरणादेस्तृणस्य कटादिभावाय प्रस्तरणं प्रोहकटा। शब्दोऽयं कटनिर्मातृव्यवहारे रूढः।

अपरेऽपि शब्दाः सन्ति प्रयोगे लुप्ताः, व्यवहारस्य लुप्तत्वात्। तथाहि। सण्डो वृषः। ग्रामस्य सण्डो ग्रामसण्डः। शीकारं करोति शैत्येन शीकायते। सद्यः पिष्टाः सक्तवो दृषच्छारदाः। गोष्ठे श्वा गोष्ठश्वः। 'DOG IN THE MANGER' इत्यर्थे प्रत्युक्तो भवेत्।

किञ्च 'कर्णे लक्षणस्याविष्टे'त्यादिसूत्रेण दात्राकर्ण इत्यादयः शब्दा व्युत्पादिताः। पशूनां स्वामिविशेषज्ञापनार्थं दात्राकारादिचिह्नमद्यापि पशुपालैः क्रियते। तच्चिह्नमुच्यते लक्षणमिति। यस्य पशोः कर्णे दात्राकारं चिह्नं स दात्राकर्णः। कर्णशब्दे परे विष्टादीनां दीर्घो न। यथा भिन्नकर्णः, छिद्रकर्णः। एते शब्दाः पशुपालानां व्यवहारे सम्भवन्ति।

अपि च दिक्छब्देभ्यस्तीरस्य तारभावो वेति वार्तिकम्। दक्षिणतीरमित्यर्थे दक्षिणतारम्। एवमुत्तरतारम्। कथमेतादृशा विकाराः सम्पद्येरन् यद्येते

शब्दाः पण्डितमात्रव्यवहारविषयाः । रूढिवशात् शिष्टैरपि परिगृहीता इति तेषां साधुत्वमन्वाख्यायते शास्त्रकारैः ।

एतैरपरैश्च प्रमाणैरत्रापरामृष्टैः साधु सिध्यति, संस्कृतभाषा लोकव्यवहारार्थमुपयुक्ता, न तु ग्रन्थमात्राश्रया पण्डितगोष्ठीमात्राश्रया वेति । यदि तादृशी सती विद्याशालासु प्रयत्नाधिगम्यैवाभविष्यत् तर्हि पूर्वोक्ताः व्यावहारिकभाषासाधारणाः स्वरूपविशेषा नोदपत्स्यन्त । व्यवहारमात्रोपयुक्ताः शब्दाश्च नावकाशमलप्स्यन्तेति शम् ॥

संज्ञापदानि तावत् परिवृत्तिं न सहन्ते । तस्मात् नेहरू महाशयः, मद्रासूनगरम्—इत्येव वक्तव्यं भवतीति स्पष्टम् । एवमेव संस्कृतपदसामानाधिकरण्येन अन्यभाषाशब्दानां कचित् प्रयोगे का हानिः ? यथा— रैल्वेयानम्, बसूवाहनम् । चक्रूपत्रम् इत्यादि ।

रसस्वरूपम्

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात् सारयति च ।
क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥

सर्वेषु विषयेषु अनुभवः परमं प्रमाणम् । यदिन्द्रियैरुपलभ्यते, तदपलपन् पुरुषो लोके न प्रामाणिकत्वेन गण्यते । साक्षादुपलब्धमपि उपालब्धुं जनाः प्रयतन्ते चेत्, शास्त्रव्यापारोऽस्तमियात् । तदाहुः—

परश्शतपरीवादात्परस्तादपि वादिभिः ।
उपलम्भबले स्थेयं तदादौ किं न गृह्यते ? ॥

इति । एतादृशः सर्वप्रत्यक्षविषयः कश्चन अनुभवोऽस्ति, यः आह्लादात्मकः जगदेव विस्मारयितुं शक्नोति । उत्तमानां काव्यानां पठने, श्रेष्ठानां नाटकानां दर्शने, रमणीयस्य सङ्गीतस्य श्रवणे, सुन्दरस्य चित्रादेरवलोकने च मानवस्य मनः कामपि विगलितवेद्यान्तरां स्थितिं गच्छति, सुखमयीं दशामृच्छति, मोक्षपरमानन्दमिवानुभावयति, जन्मनः सार्थक्यं च विन्दति । एतादृशः कोऽप्यनुभवो वर्तत इत्यत्र न कस्यापि मतिमतो मनागपि सन्देहः । उक्तं हि महिमभट्टेन

"काव्यस्यात्मनि धर्मिणि रसादिरूपे न कस्यचिद् विमतिः" इति ।

किन्तु ज्ञातस्यापि, अनुभवविषयस्यापि वस्तुनः स्वरूपस्य विषये विविधा विवादा विद्यन्ते । यथा आत्मा सर्वप्रत्यक्षविषयः । सर्वेषाम् अनुभवानां मूलम् आत्मैव । आत्मैव न भवति चेत्, कः अनुभवति ?, को वा तमनुभवम् अपलपति ? तथापि आत्मस्वरूपे वादिनां परश्शतं विप्रतिपत्तयो विपश्चिदपश्चिमान् अपि अनिश्चलमतीन् कुर्वन्ति । तथैव रसस्य विषयेऽपि ।

सर्वो रसम् आस्वादयति । रसानुभवादात्मानं वञ्चयितुं न कोऽप्यवैधेयो वाञ्छति । तथापि रसस्य स्वरूपं किमिति पृच्छामश्चेत्, न कोऽपि समीचीनं यच्छति समाधानम् ।

ननु रसानुभवमूलं रसनिष्यन्दि काव्यं ये कुर्वन्ति, ते कवयः प्रष्टव्याः किं वा रसस्वरूपमिति । नैतदेवम् । कवयः प्रतिभया भव्यानि दिव्यानि नव्यानि काव्यानि रचयितुं प्रभवन्ति । किन्तु तानि विमर्ष्टुं ते सदा शक्नुवन्तीति वक्तुं दुष्करम् । केषाञ्चिच्छक्तिः सर्जने, केषाञ्चिद्विमर्शने । उभयमेकत्र विरलतयोपलभ्यते । श्रूयते हि—

न ह्येकस्मिन्नतिशयवतां सन्निपातो गुणानाम्
एकस्सूते कनकमुपलस्तत्परीक्षाक्षमोऽन्यः ।
कश्चिद्वाचो रचयितुमलं मर्ष्टुमेवापरस्तां
कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति ॥ इति ।

प्रायः सर्वो नरो रसानुभवं कर्तुं शक्नुयात् । सहस्रेष्वेकः सुकृती कृतीर्निर्मातुं प्रभवेत् । लक्षेष्वेको विज्ञानी कृतिनिर्माणे कृतिचर्वणे च मानवस्य मनोव्यापारान् विमृश्य गूढं तत्त्वं विकास्य स्पष्टयितुं पारयेत् । अतः रसचर्वणादपि रसमयकाव्यनिर्माणादपि रसानुभवरहस्योद्घाटनं कष्टतरमिति विचक्षणा आचक्षते । तथापि तदर्थं प्रयतनीयमेव धिषणाशालिभिः । यत्नं विना न लभ्यते खलु रत्नम् ।

रसस्वरूपजिज्ञासया प्रतिष्ठमानैः ज्ञानमार्गपथिकैः प्रथमं प्रत्नानां मनीषिणां विचारा गोचरीकरणीयाः । तदैव शेमुषी मुषितविघ्ना उच्चैरुच्चैरारोढुं प्रभवति । उक्तं हि रसशास्त्रपरमाचार्यैरभिनवगुप्तपादैः—

ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं धीः पश्यति श्रान्तिमवेदयन्ती ।
फलं तदाद्यैः परिकल्पितानां विवेकसोपानपरम्पराणाम् ॥ इति ।

प्राचीनसंख्यावत्परिकल्पितसोपानपरम्परारूढैरेव रसशिखरिशिखरारोहणं शक्यते। अतः पश्याम आदौ किं तैः सूक्ष्मेक्षणैरत्र विषये प्रपञ्चितमिति। भरतमुनिर्भरतवर्षस्य वरिष्ठः नाट्यवेत्ता मनोविज्ञानी चासीदिति विदितमेव विदुषाम्। नाट्यशास्त्रे षष्ठाध्याये तेन रसानां विवेचनाकारि। विश्वप्रसिद्धं तत्सूत्रं चेदम्— "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति। न केनापि विदुषा, अर्वाचीनेन वा प्राचीनेन वा, भरतस्य सूत्रमनादरेण दृष्टम्। तस्यैव सूत्रस्य सहस्रधा व्याख्यानं कल्पयन्ति स्वप्रज्ञानुसारेण, न पुनः केऽपि तत्र दोषम् उद्घाटयन्ति। मुनिवाक्यप्रभावस्तादृशः।

लोके रतिहासक्रोधादीनां चित्तवृत्तीनां यानि कारणानि सन्ति वनितादीनि, तानि कविप्रतिभोद्भासितानि काव्यनाटकादिषु सहृदयैः ज्ञानगोचरीक्रियमाणानि विभावशब्देन व्यपदिश्यन्ते। तथैव तेषां कार्याणि अनुभावशब्देन, सहकारीणि च व्यभिचारिभावशब्देन शास्त्रे व्यवह्रियन्ते। एतेषां साधीयान् समवायः सहृदयगोचरीभूतः तस्मिन् चित्तवृत्तिमेकां समुद्बोधयति, परिपोषयति, परां काष्ठां च नयतीति सकलानुभवसिद्धम्। तमिममर्थं भरतः सूत्रेणाबोधयत्। किन्त्वत्र समया एका वर्तते। विभावानुभावव्यभिचारिणां संयोगात् रसस्य निष्पत्तिर्भवतीति चेत्, एतेषां संयोगः परस्परं वा, एतेषाम् अन्येन केनापि संयोगो वा? संयोगश्च कीदृशः? तार्किकानुमतः संयोगो न सम्भवति, द्रव्ययोरेव संयोगस्याभ्युपगतत्वात्, चित्तवृत्तिविशेषरूपाणां व्यभिचारिणां द्रव्येतरत्वात्। संयोगश्च भवन् कुत्र भवेत्? रङ्गे वा, कविहृदये वा, सहृदयहृदये वा? निष्पत्तिर्नाम का? जनिर्वा, अनुमितिर्वा, व्यञ्जना वा, अन्यद्वा किञ्चित्? निष्पद्यमानो रसः अनुभवात्मको वा, अनुभूयमानचित्तवृत्तिविशेषो वा, चित्तवृत्त्यभिव्यञ्जित आत्मा वा? इत्यादयः प्रश्नाः समुद्भवन्ति।

सर्वैरविगानेनाभ्युपगम्यमानोंऽशः एषः । काव्यानि पठित्वा नाटकानि दृष्ट्वा च जनाः रसानुभवं कुर्वन्तीति । अन्यथा तत्र पौनःपुन्येन प्रवृत्तिर्न स्यात्। सोतारामयोः सुभद्राधनञ्जययोर्वा प्रेम कविना वर्ण्यमानं नटादिभिः प्रदर्श्यमानं वा गोचरीकृत्य जनाः शृङ्गारानुभवं कुर्वन्ति । सीतारामादयः रसानुभववेलायां नैव सन्ति । केचित्तु नायकादयः केवलं कविप्रतिभोन्मीलिताः वस्तुतः क्वापि कदापि नासन्, न सन्ति, न भविष्यन्ति च । अतो वर्णितेषु नायकादिषु रसस्य स्थितिः नैव । नटाः विभावा भूत्वा अनुभावान् प्रदर्शयन्ति व्यभिचारिवन्त इव च दृश्यन्ते । किन्तु तत्रापि रसानुभवाभ्युपगमः समस्याम् उत्थापयति । रसाविष्टमनाः विगलितवेद्यान्तरं सुखमनुभवन् नटः नाटककारकल्पितां सरणिम् एव कथम् अनुसरेत्? नाटकेषु हि प्रतिनायकपात्रधारी बलवत्तरोऽपि नायकेन हन्यते। वीररसानुभवी नायकमेव हन्याच्चेत् का गतिः? अत एवोक्तम्—"न रसं स्वदते नटः" इति । एवं च रसस्याधिष्ठानं न रामादिः, न च नटः, किन्तु सहृदय एवेति स्पष्टं भवति ।

रतिहासादयः चित्तवृत्तयः । एत एव वासनात्मतया आत्मनि संस्कारवशात् स्थिताः स्थायिभावा इति कथ्यन्ते। विभावादीनां संयोगेन उद्बोध्यमानाः परिपोष्यमाणाश्च रसीभवन्ति । उक्तं हि मम्मटेन—

"व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः" इति ।

काव्यव्यापारेण साक्षात्क्रियमाणाः चित्तवृत्तयः किमपि सुखम् अनुभवपथम् आनयन्ति । अत एव रसस्यानन्दात्मता । केचन वेदान्तिनः 'आनन्दो ब्रह्म' इत्यादिश्रुतिं प्रमाणयन्तः रसस्यैव आत्मत्वं ब्रह्मत्वं वा प्रतिपादयन्ति । "रसो वै सः" इत्यादीनि वाक्यानि च तेषाम् अनुकूलानि । किन्तु ब्रह्मसाक्षात्कारदूराः अस्मादृशस्तु तत्र कथं विश्वासं

प्रकटयेम ? रस आनन्दरूप इत्यत्र न नो विप्रतिपत्तिः । आत्म-ब्रह्मादि-विषयस्तु वेदान्तिवेतण्डमण्डलमण्डनायमानानां पण्डितानामेव सुभगः ।

एवं च चित्तवृत्तिः स्थायिशब्दाभिधेया परिपोष्यमाणा रसत्वमाप्नोति इति फलति । किन्तु परिपोषः कथं सेत्स्यति ? विभावादीनां संयोगेनेत्यब्रूम । सत्यम् । किन्तु संयोगो नाम कीदृशः ? क्व एतेषां संयोगो जायताम् ?

सहृदयबुद्धौ एतेषां संयोगः । संयोगः समाने काले बुद्धिविषयत्वमेव । ननु ज्ञानं क्षणिकम् । यथा यथा ग्राह्यवस्तु अन्यदन्यद् भवति, तथा नूतनानि ज्ञानानि भवन्ति । एवं च नानाविषयाणां परम्परया विषयीभवताम् एकज्ञानविषयत्वं कथं सम्भवेदिति चेत्, सत्यम् । तथापि धारावाहिकतया जायमानं ज्ञानकुलम् एकतया गण्यते । पूर्वज्ञानस्य संस्कारे स्थिते ज्ञानान्तरस्योत्पत्तौ परिणामो भिद्यते खलु । यथा इदानीं 'ख' इत्युच्चार्य घण्टानन्तरं 'गः' इत्युच्चार्यमाणे श्रोत्रा कोऽप्यर्थो न गृह्यते । 'खग' इत्युच्चार्यमाणे तु पक्षिरूपोऽर्थः चेतसि भासते । तत्र कारणं संस्कारस्य अनष्टत्वम् एव । तथैव आत्मनि विभावादिगोचरीकरणजाताः संस्कारा अनुभवस्यैक्यजननहेतव इति भाति । तादृशैक्यप्राप्तिमेव संयोग-पदेन मुनिः प्रत्यपिपादयिषत् ।

निष्पत्तिपदस्यार्थस्तु बहुभिर्बहुधा वर्ण्यते । भट्टलोल्लटादयः रत्यादिको भावो मुख्यया वृत्त्या रामादौ, तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस इति भणन्ति । रामः सीताविषयकरतिमान् इति ज्ञानं सामाजिकानां जायत इति एतेनोक्तं भवति । प्रतीतिरेतादृश्येव रसस्य निष्पत्तिः । अहो ! एतावतः साधारणस्य ज्ञानस्य कृते कविना नटेन सामाजिकेन च कियान् परिश्रमोऽत्र सोढव्यः ! लोके कामपि स्त्रियम् अनुगच्छन्तं,

सर्वथा तस्या अनुरोधम् इच्छन्तं पुरुषं दृष्ट्वा अस्मासु प्रतोतिर्जायते 'एषोऽस्याम् अनुरक्त' इति । किन्तु तत्र रसानुभवो नास्ति । यदि नाटकादावप्येवं, का कथा रसानुभूतेः ?

श्रीशङ्कुकादयोऽपि नेतो रमणीयतरां सरणिमनुसस्रुः । अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेन अन्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानः रत्यादिर्भावः तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति ते कथयन्ति । काव्यानुमितेरेष विशेषः, यदानन्दं जनयति स इति तदभिप्रायः । नटादिषु कृष्णत्वादिसम्भावनायां तात्कालिकं तच्चरितानुकरणं निदानम् । चित्रतुरगन्यायेन सम्यङ्मिथ्यासंशयसादृश्य-प्रतीतिभ्यो विलक्षणा काचित् प्रतीतिर्नाटकादिषु सामाजिकमनसि जायते । ततः वस्तुतो नटे असन्नपि रतिक्रोधादिः भावः अनुमीयमानो वासनाबलाच्चर्व्यत इति एषां सिद्धान्तः ।

अपेशलमेतत् । लोकादवैलक्षण्यापातात् काव्यनाटकादेः । केवलानु-मित्या आनन्दो जायत इति अनुभवविरुद्धम् । सहृदयाः काव्यपठन-वेलायां 'सोता रामविषयानुरागवती, तद्दर्शनजनितरोमाञ्चनेत्रविकासादि-मत्वात्, यत्र यत्र एते अनुभावाः तत्र तत्र अनुरागः, यथा मत्पत्नी, इयमपि तथा इत्याद्यनुमानं कुर्वन्तु नाम, निर्णयं च प्राप्नुवन्तु कामं, किन्तु तादृशसन्दर्भे वर्णनोयतन्मयोभवनस्य सकलप्रपञ्चव्यवहारविस्मरणस्य परनिर्वृतिप्राप्तेश्च कारणं किम् ?

हृदयदर्पणकार इति कथ्यमानो भट्टनायकः भोगाख्यं भावनाख्यं च व्यापारं कल्पयित्वा काव्यव्यापाररहस्यम् उद्घाटयितुं प्रयतते । भावना नाम भावकत्वम् । काव्यनाटकादिषु शब्दगतः भावकत्वाख्यः व्यापार-विशेषः विभावादीन् साधारणीकरोति । साधारणीकरणमेव वस्तुसौन्दर्या-पादने निदानम् । रामत्व-सीतात्वादिपरिहारेण विभावाः साधारणीकृताः

सामाजिकानां चर्वणायोग्या भवन्ति । तेषां चर्वणैव भोगः । स एवानन्ददायी । साधारणीकरणमेव सूत्रगतस्य संयोगशब्दस्यार्थः । भोग एव निष्पत्तिः ।

भट्टनायकाभिमतं साधारण्यम् अन्यथा वर्णयन्ति केचित् । नाटकादीनां द्रष्टा सीतादीनां सीतात्वादिकं परिहर्तुं न शक्नोति । तत्र सीतादिपदप्रयोगस्य, सीतामात्रगताचारव्यवहारादेश्च नाटके दर्शनात् । अपि तु साधारणीकरणेन आत्मानं रामादिना साधारणं विधत्ते । अत एव तन्मयीभावः सिध्यति । रामकृतानां विशिष्टानां कार्याणां समुद्रलङ्घनादीनां च आत्मनि तदा सम्भावयति । अत एवानन्दोद्रेकः । मानवस्य सर्वस्यापि विविधाः आशाः भवन्त्येव । तासां वास्तवी सिद्धिर्लोके न सम्भवति । कस्य वा सुन्दरीप्रेमपात्रीभवने आकाङ्क्षा नास्ति ? को वा शत्रून् समूलघातं निहन्तुं नेच्छति ? को वा जगदाश्चर्यकरं कर्म कृत्वा सर्वाभिमानभाजनीभवितुं न वाञ्छति ? किन्तु वास्तवे जीवने एतत्सर्वं कर्तुं क्वाचित्कतया कोऽपि शक्नुयाद्वा, न वा । नाटकादिषु नायके साधारणीकरणद्वारा तन्मयीभावं सम्पाद्य सर्वं कृतवानिव अभिमन्यते जनः । अत एवानन्द इति । उक्तं च दर्पणे विश्वनाथेन—

> व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः ।
> तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः ।
> प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते । इत्यादि ।

पाश्चात्यविमर्शकाः तत्त्वमिदम् अन्यथा वर्णयन्ति । अरिस्टाटल्महाशयः Catharsis इत्येकां परिकल्पनां प्रस्तौति । एतदपि मनश्शास्त्रपथानुगामि । मानवस्य मनसि अनेकाः भावनाः सञ्चिता भवन्ति । यथा कस्यचिद् विषये कोपो जायते, किन्तु तस्य बलवत्तरत्वाद्वा कारणान्तराद्वा तं कोपं प्रकटयितुं न शक्नोति मानवः । रति-हास-शोकादीनां चेयमेव सरणिः । तथा दमनविषयीभूताः क्रोधादयः चित्तस्वास्थ्यं विदलयन्ति । अतः तेषां

विरेचनेन चित्तस्य स्वस्थता सम्पादयितव्या। नाटकादिकं तत्र श्रेष्ठ उपायः। प्रेक्षको नायकादितादात्म्यं भावनाविशेषेण प्राप्य, तासु तासु वाक्षु क्रियासु च स्वस्य क्रोधादिकं बहिर्निष्कासयति। शरीरान्मलापगमे, ज्वरादिनिवृत्तौ च यथा आनन्दोऽनुभूयते, तथात्रापि इति अरिस्टाटला-दीनां विदुषाम् आशयः।

साधारण्यम् अन्यथापि वर्णयितुं शक्यते। एकेन भुज्यमानं किमपि नाधिकं सुखयति। यदा बहुभिः मिलित्वा तदेव भुज्यते, तदा सुखादिकम् अतितमां वर्धत इति लोकानुभवसिद्धम्। जनरहिते गृहे स्थित्वा एककेन भुज्यमानं पीयूषमपि न तथा आनन्ददायि, यथा सग्धौ बहुभिः समं खाद्यमानं साधारणमन्नम्। नाटकादिषु रत्यादयो भावाः प्रेक्षकाणां गणेन अनुभूयन्ते, न त्वेकाकिना। अतस्तत्र आस्वादाधिक्यम् इति।

कथमप्यास्तां नाम, साधारणीकरणनाम्नीं परिकल्पनां प्रस्तुत्य भट्टनायको भेजे परमां कीर्तिम्। आचार्या अभिनवगुप्तपादाः मार्गेणानेन उन्नततरां चिन्तनां प्रकटीकृत्य साक्षिभास्यो रत्यादिर्भाव एव रस इति प्रत्यपीपदन्। भग्नावरणा चित् रसः, तस्यैकत्वेऽपि उपाधिभेदेन शृङ्गारादिनाम्ना व्यवहार इति व्याचक्षते केचन। पण्डितराजो जगन्नाथः "सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छदिते स्वात्मनि अज्ञानावच्छिन्ने शुक्तिकाशकल इव शुक्तिखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यशकुन्तलादिविषयक-रत्यादिरेव रस" इति राद्धान्तं करोति। अद्वैतवेदान्तप्रसिद्धानां तत्त्वानां रसविमर्शे बलात्प्रवेशनं केवलं पाण्डित्यद्योतकं, न तत्र वास्तवी अपेक्षा तेषाम् इति आस्माकीनः अभिप्रायः। काव्यास्वादजन्य आनन्दः ब्रह्मा-स्वादसहोदरः इत्याद्याग्रहे अर्थो नास्तीति अस्माकं प्रतिभाति। ब्रह्मास्वादः कीदृश इति वयं न जानीमहे। कुतो व्यर्थः प्रयत्नः तेन तुलनायै ?

रसगङ्गाधरकारो वादं विजृम्भयितुं बहुधा प्रयतते। वदति सः "चर्वणा चास्य चिद्गतावरणभङ्ग एव प्रागुक्ता, तदाकारान्तःकरणवृत्तिर्वा, इयं च परब्रह्मास्वादात्समाधेर्विलक्षणा, विभावादिविषयसंवलितचिदानन्दालम्बनत्वात्। भाव्या च काव्यव्यापारमात्रात्। अथास्यां सुखांशभाने किं मानमिति चेत्, समाधावपि तद्भाने किं मानमिति पर्यनुयोगस्य तुल्यत्वात्" इति। एतादृशैर्वादैः प्रतिबन्दिप्रधानैः काव्यवर्त्मनि प्रयोजनं नास्ति। मद्यं पिबन्तः केचन जगदेव विस्मृत्यानन्दन्ति, तेषाम् आनन्दः ब्रह्मास्वादसहोदर इति कथ्यते चेत् किम् उत्तरम्? अतो रसास्वादस्य वास्तवी पद्या का? इति विचारणीयं, न पुनः सहृदयैः वेदान्तादिशास्त्रप्रसिद्धतत्त्वानां प्रवेशनाय व्यर्थः प्रयत्नः करणीय इति भाति। इत्थं च परमरमणीयः सुधासध्रीचीनः प्राचीनार्वाचीनकविप्रयत्नविषयीभूतः, भरतादिभिर्मुनिभिर्व्याचिख्यासितो रसः— मानवचेतसि (अथवा आत्मनि) संस्काररूपेण अवस्थितानां रतिहासक्रोधादीनां स्थायिभावानां मननविषयीभूतकाव्यवचनैः, दर्शनविषयीभूतचतुर्विधाभिनयमयनाटकादिभिर्वा उद्बोधनपोषणैः बुद्धिगोचरीभूतानां विगलितवेद्यान्तरेण, साधारणीकरणद्वारा तन्मयीभावं प्राप्तवता अन्तरङ्गेण क्रियमाणा चर्वणा—इति फलति। प्राचीनानां दृष्टिः दुष्टेति न विवक्षितम् अस्माभिः। तदाधारेणैव उत्तरोत्तरं चिन्तयितुं शक्यत्वात्। अमुमेवाभिप्रायं प्रकटयता अभिनवगुप्तवचनेन वचोव्यापारमिमं समापयामः।

तस्मात्सतामत्र न दूषितानि
  मतानि, तान्येव तु शोधितानि।
पूर्वप्रतिष्ठापितयोजनासु
  परप्रतिष्ठां फलमामनन्ति॥

सांप्रदायिकं संस्कृतशिक्षणम्

संस्कृतशिक्षणविषये तावदिदानीं सर्वत्रानुस्त्रियते द्वयी पद्धतिः। संस्कृतशालासु संस्कृतमहापाठशालासु च अनुस्त्रियमाणा पद्धतिरेका। अन्यत्र लौकिकविषयशिक्षणपरासु प्रौढशालासु विश्वविद्यानिलयसंबन्धिनीषु महाशालासु च आद्रियमाणा पद्धतिरपरा। अनयोश्च पद्धत्योः प्रथमा तावत् प्राचीना सांप्रदायिकीत्युद्घोषः। 'नास्ति तद्वस्तु लोके यन्न निर्दोषं न निर्गुणम्' इति न्यायेन पद्धतिद्वितयेऽप्यस्ति गुणः, अस्ति च दोष इति मन्यते मे मानसम्।

कोऽसौ सांप्रदायिकः शिक्षणक्रमः? अस्माकमध्ययनकाले यं क्रममनुरुन्धानैर्गुरुभिः वयं पाठशालासु पाठिताः— शिक्षिताः, सोऽयं क्रमः सांप्रदायिक इति मन्यतेऽस्माभिः। वर्षदशकत्रितयात् प्राक् या शिक्षणपद्धतिर्दृश्यते स्म पाठशालासु सा पद्धतिरिदानीं प्रायः न दृश्यते, वह्वंशैः सा पद्धतिरन्यथाकृता। सन्ति चात्र बहूनि कारणानि। पठ्यपुस्तकनिर्देशनं, परीक्षाविधानं, छात्राणामलसता, क्वचिदध्यापकानामसामर्थ्यञ्चेति समुदित्य भवन्ति कारणानि। तस्मादत्र न कोऽप्यङ्गुलिनिर्देशेन शक्यो दोषपदमारोपयितुम्।

संस्कृताध्ययनं द्वेधा शक्यते विभक्तुम्, भाषाध्ययनं शास्त्राध्ययनञ्चेति। शास्त्रमधिजिगांसमानानां भाषाज्ञानं प्रथमः कल्पः, यदवलम्बेनैव शास्त्रेषु बुद्धिः क्रमते। अत एव प्रथमाकाव्यसाहित्यकक्षासु भाषाध्ययनं पूर्णतामियात्, ततो भवतु शास्त्रेषु प्रवेशः इति सूक्ष्मदर्शिभिः प्राचीनैः शिक्षणव्यवस्था कृता कर्णाटकदेशे। साहित्यपरीक्षामुत्तीर्णस्य चम्पूनाटककाव्यानां सिद्धान्तकौमुद्याः मुक्तावल्याश्च अभ्यासेन संस्कृतभाषायां निरर्गलः प्रवेशो भवति स्म। अमरकोशकाण्डत्रयस्य, सर्वेषां नामपदानां

क्रियापदानाञ्च वाचोविधेयता तस्य समभूत्। साहित्यान्तमधीतमनेन इति प्रशंसापरः प्रवादो रूढ आसीत्। तदिदं सर्वं प्राचीनशिक्षणपद्धतेरनुसरणस्य शुभः परिणामः।

काव्याध्यापनं कथं निर्वर्तयन्ति स्मास्मद्गुरव इत्यत्र किञ्चिन्निदर्शनं पुरो धातुमीहते मे चेतः। रघुवंशमहाकाव्यस्य प्रथमसर्गे तृतीयोऽयं श्लोकः—

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥

कथमस्य श्लोकस्य अध्यापनप्रकारः? प्रथमं तावदध्यापकः श्लोकमिमं स्पष्टमुच्चैः पठति। ततश्च पुरोनिषण्णानां छात्राणां मध्ये त्रिचतुरैः छात्रैः श्लोकोऽयं क्रमादनुपठनीयः। ततो द्वित्रैः पदविभागः कर्तव्यः। श्लोकपठनावसरे पदविभागकाले वा ये दोषाश्छात्राणां संभाव्यन्ते तान् दोषान् तत्र तत्र अध्यापकः शोधयति। तदनन्तरं सर्वेषामपि पदानाम् अन्तलिङ्गवचनविभक्त्यादयः क्रमेण छात्रैर्निर्देशनीयाः। तद्यथा—मन्दः, मन्दः मन्दौ मन्दाः . . . . मन्दे मन्दयोः मन्देषु इत्यन्तं मन्दशब्दं पठित्वा 'अकारान्तः पुलिङ्गो मन्दशब्दः प्रथमैकवचनान्तः' इत्येवं समापनीयम्। ततः कवियशःप्रार्थीति शब्दः। एवं सर्वेषां नामपदानाम्। गमिष्यामीति क्रियापदम्। तत्रैवं वक्तव्यम्। गमिष्यति-गमिष्यतः-गमिष्यन्ति। गमिष्यसि-गमिष्यथः-गमिष्यथ। गमिष्यामि-गमिष्यावः-गमिष्यामः। गम्लृ गतौ। गत्यर्थकात् गम्लृधातोः सकर्मकात् परस्मैपदिनः कर्तरि लृटि उत्तमपुरुषैकवचने गमिष्यामीति रूपम् इति। इवेत्यव्ययमित्येव। एवं समेषां शब्दानां लिङ्गवचनादिकीर्तनानन्तरं श्लोकस्थानां शब्दानामन्वयक्रमं प्रदर्शयति। स च क्रमः छात्रेणापि दर्शनीयः। ततोऽन्वयानुसारेण श्लोकार्थं कथयति गुरुः। ततो द्वित्रैश्छात्रैः अन्वयक्रमेण अर्थो वाच्यः। अनन्तरं श्लोकतात्पर्यं रसवत्या

शैल्या बोधयित्वा समस्तपदानां विग्रहं व्याकरणविशेषांश्च दर्शयति गुरुः। ततश्च श्लोकस्य पदविशेषाणामाकरभूताः अमरकोशपङ्क्तयः छात्रैरेव उदाहर्तव्याः। तद्यथा। मन्दः—'मूढाल्पापटुनिर्भाग्या मन्दाः स्युर्द्वौ तु शारदौ'। कविः—'धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः'। यद्यत्र कश्चिच्छात्रः 'उशना भार्गवः कविः' इति कोशमुदाहरेत्, तर्हि तद्वाक्यं प्रकृतासंबद्धमिति गुरुः शोधयति। तदनन्तरमाकांक्षामर्यादा प्रदर्शनीया। तद्यथा—नदीनां सागरो गतिरिति न्यायेन सर्वेषां पदानामाकांक्षा क्रियापदे परिसमाप्यत इति कृत्वा क्रियापदमारभ्य आकांक्षा प्रदर्श्यते। यथा अत्रैव श्लोके गमिष्यामीति क्रियापदम्। गमिष्यामि। कः? अहम्। अहमित्यध्याहारः। कीदृशोऽहम्? मन्दः। पुनश्च कीदृशः? कवियशःप्रार्थी। कां गमिष्यामि? उपहास्यताम्। क इव? वामन इव। कथंभूतो वामनः? उद्बाहुः। कस्मिन्? फले। कीदृशे फले? प्रांशुलभ्ये। कस्मात्? लोभात्। इति। तदनन्तरं सर्वे समुदित्य श्लोकं पठन्ति। एवमेकस्यां घण्टायां द्वित्राः श्लोका अभ्यसनीयाः भवन्ति। परेद्युश्च पूर्वेद्युरधीतं सर्वं गुरवे निवेदनीयम् इत्येषा पद्धतिरासीत्। एवं रघुवंश-कुमारसंभव-किरातार्जुनीय-माघ-नैषधेषु पञ्चस्वपि महाकाव्येषु प्रतिकाव्यं द्वित्राः सर्गाः क्रमेण अधीयन्ते स्म इति काव्याध्ययनपद्धतेः दिक्प्रदर्शनमेतत्। एवमधीतवतश्छात्रस्य संस्कृतभाषायां साधीयसी व्युत्पत्तिः संपद्यत इत्यत्र को विस्मयः? एवं व्युत्पन्नानां विद्यार्थिनां चम्पू-नाटकाध्ययने सुतरामार्हन्ती वरीवृत्यते। चम्पूनाटकाध्यापनप्रकारो विस्तर-भयान्नात्र प्रदर्श्यते। तदिदं साहित्यान्तमध्ययनम्। स एष प्रकारः अद्यत्वे पाठशालासु जागर्ति न वेत्यत्र विद्वांसः प्रमाणम्।

ततः शास्त्रेषु प्रवेशः। अधुनातनी शास्त्राध्यापनपद्धतिस्तु नातीव भिद्यते सांप्रदायिकपद्धत्या इति समुच्छ्वसन्तीव वैदुष्यप्रियाणां प्राणाः। परन्तु शास्त्राणामध्ययनविधिर्विद्यार्थिनां भिद्यते। नाहमिदानीमिमं विषयं

विवरीतुमात्मानं व्यापारयामि। शिक्षणक्रमे चास्मिन् यन्मे वैगुण्यमित्यभिमतं तत्तु किञ्चिदिव स्पष्टयितुमभिलषामि । प्राचीनपद्धत्या समधिगता वैदुषी तलस्पर्शिनी शास्त्रस्य, आधुनिकपद्धत्या समार्जिता तु केवलमायाम-स्पर्शिनीत्यस्ति प्रवादः। यद्यपि प्रवादोऽयं यथार्थ एव तथापि आधुनिकपद्धतौ सन्ति केचिद्गुणा, येऽस्माकमपेक्षणीया इति मे दृढा मतिः । इदानी-मस्माभिर्महापाठशालासु अनुस्रियमाणे शिक्षणक्रमे छात्राणां नवोत्साह-दायिनी प्रतिभोन्मेषकारिणी स्वतन्त्रा विचारशक्तिः बलवती भवितुं नावसरं लभते । शास्त्रपङ्क्तीनां यथाश्रुतं शब्दार्थं निरुच्य, क्वचिल्लक्ष्य-लक्षणसमन्वयञ्च कृत्वा कृतकृत्यमात्मानं मन्यतेऽध्यापकः । न च तदुपरि स्वातन्त्र्येण विचारयति, न च तस्मिन् विषये विवेक्तुं शिष्यं चोदयति, न च ग्रन्थान्तरं परिशीलयति, न च पूर्वापरविरोधमनुसंधत्ते, न च शङ्कते, न वा समाधत्ते । तत्फलतया शिष्यो यथाश्रुतग्राही संपद्यते । ग्रन्थोक्तादन्यत् किमपि न जानाति । स्वातन्त्र्येण किमप्यूहितुमप्येष न समर्थयते । उपमालङ्कारस्य किमुदाहरणमिति प्रश्ने 'चन्द्र इव मुखम्' अथवा 'कमलमिव मुखम्' इत्युत्तरं निर्बाधं निरीक्षणीयं भवति । पूर्णोपमायाश्च 'हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते' इत्येतदेवोदाहरणं मन्यते, नान्यत् कल्पयितु-मीष्टे । अस्मिन् प्रसङ्गे शिक्षकेण छात्रान् प्रत्येवमादेशः कर्तव्यः "युष्मा-भिर्यान्यधीतपूर्वाणि काव्यानि तेषु दृष्टानुपमालङ्कारान् संगृह्णीत । स्वयञ्च उपमालङ्कारसहितानि वाक्यानि रचयत" इति । वामनस्य काव्यालङ्कार-सूत्रं पठ्यत्वेन निर्दिश्यते। सरलानि वामनसूत्राणि अल्पीयांश्च वृत्तिग्रन्थः । "रीतिरात्मा काव्यस्य, विशिष्टा पदरचना रीतिः, विशेषो गुणात्मा' इत्यस्ति सूत्रत्रयम् । कथमेतस्य विवरणम् ? रीतिः काव्यस्य आत्मा भवति । गतं प्रथमसूत्रम् । का नाम रीतिः ? विशिष्टा पदरचना रीतिः । गतं द्वितीयसूत्रम् । विशिष्टेत्यस्य विशेषेण युक्तेत्यर्थः । को नाम विशेषः ?

विशेषो गुणात्मा । विशेषो नाम गुणः इत्यर्थकथने गतं सूत्रत्रयम् । अधीतकाव्यचम्पूनाटकस्य छात्रस्य किमेतावदर्थज्ञानं दुःशकम् ? एतावदर्थकथनाय कश्चिदध्यापक आवश्यको वा ?

मन्ये, अस्य सूत्रत्रयस्य व्याख्याने दिनत्रयमावश्यकमिति । काव्यस्य आत्मत्वेन कं पदार्थमभिमन्यन्ते लाक्षणिका इति तावद्विवेक्तव्यम् । ततश्च दण्डिप्रभृतयोऽन्ये आलङ्कारिकाः कं कं आत्मत्वेन प्रतिपन्ना इत्यालोचनीयम् । रीतिरात्मेति प्रतिजानतो वामनस्य आशयः परिशीलनीयः । रीतिश्च पदरचना वर्णानुपूर्वीत्यनर्थान्तरम् । आत्मत्वेन संमतायां वर्णानुपूर्व्यां को नाम चमत्कारोदयः ? नीरसेषु ग्रन्थेषु वर्णानुपूर्व्या अवश्यंभावात् । पदरचनां विशिष्टेति विशेषयतो, गुणस्य विशेष इति संज्ञां कुर्वतश्च शास्त्रकारस्य किमाकूतमिति विमर्शनीयम् । तदिदं प्राचीनशिक्षणक्रमे हीयत इति महद्वैगुण्यम् ।

व्याकरणशास्त्रमधीयानं छात्रं प्रति यण्सन्धेः किमुदाहरणमिति प्रश्ने 'सुध्युपास्यो मध्वरि' इत्येवोत्तरं लभ्यते न त्वन्यत् । साहित्याम्भोनिधौ विद्यमानानि शब्दरत्नानि संग्रहीतुमयं यत्न इति सत्यं विस्मृत्य व्याकरणस्य लक्ष्यभूतानि काव्यानि नैव पश्यति । गवाक्शब्दस्य रूपाणि कति संभवन्तीति परीक्षते । पञ्चशताधिकरूपाणि भवन्तीति विस्मयोत्फुललोचनो भवति ।

एवं तार्किकश्छात्रोऽपि 'पर्वतो वह्निमान् धूमात्' इत्येवानुमानप्रकारं पश्यति न त्वन्यत् । प्रभाते रथ्यां जलक्लिन्नां दृष्ट्वा सर्वोऽप्यनुमिमीते रात्रौ देवः प्रावर्षत् इति । अत्र कथमनुमानप्रयोगः ? कः पक्षः ? किं साध्यम् ? को हेतुः इति पृष्टश्छात्रो गगनमालोकते । एवमन्येषु शास्त्रेष्वप्यूह्यम् ।

गृहलेखनपरिपाटी 'Home work' इति यदुच्यते तस्य अंशतोऽपि मान्यता नास्ति सांप्रदायिकशिक्षणक्रमे । अध्यापकैश्च पाठनीयग्रन्थानां यत्

पूर्वावलोकनं तस्य गन्धोऽपि नाद्रियते। कृष्णफलकानां (Black Board) स्थापनमपि शास्त्रकक्ष्यासु अवहेलनास्पदं मन्यन्ते अध्यापकवरेण्याः ।

किञ्च, प्राचीनशिक्षणक्रमे इतिहासप्रज्ञा दूरतः परिक्षिप्ता । सिद्धान्तकौमुदीमध्यापयन्ति । ग्रन्थकर्तारं भट्टोजिदीक्षितं न स्मरन्ति । तस्य देशकालादिकं किमपि न विचार्यते । कौमुदीसहवर्तिनां काशिकाप्रक्रियाकौमुदीप्रभृतीनां नामापि न श्रूयते पाठनावसरे । विनेयजनहितेप्सया उद्दामग्रन्थरत्नानि विरचय्य उपकृतवतां महाविदुषामस्मरणं कृतघ्नतां मन्यामहे ।

सन्त्येवाद्यापि अलङ्कारशास्त्रनिष्णाता विद्वद्वराः । परन्तु न केनापि रसगङ्गाधरं पूरयितुं प्रयतितम् ।

सर्वासु प्रौढशालासु संस्कृताध्ययनस्यावकाशो नियमेन कल्पनीयः ।

*

महामहोपाध्याय पण्डितरत्नम्

लक्ष्मीपुरम् श्रीनिवासाचार्याः

"आदर्शराज्यम्" (Model State) इति बहुभिरभिनन्दितस्य पूर्वतनमैसूरुराज्यस्य शासकेषु "राजर्षिः" इति विश्रुतस्य नाल्वडि कृष्णराजसार्वभौमस्य कीर्तिवर्धकेषु अयं लक्ष्मीपुरं श्रीनिवासाचार्यः सर्वान् अतिशेते । यतः सत्स्वपि बहुषु तत्तादृशविद्वद्दिग्गजेषु श्री विरूपाक्षशास्त्रि-प्रभृतिषु अस्यैव कृतयः दर्शनोदयमानमेयरहस्यश्लोकवार्तिकादयः तदीय-कीर्तिसौरभं दिगन्तेष्वद्यापि विस्तारयन्ति ।

कोलार्प्रान्तसमीपस्थः लक्ष्मीपुरनामा अग्रहारः अस्य जन्मस्थानम् । क्रैस्त 1865 संवत्सरे जन्म । तिरुमलैनल्लान् चक्रवर्तिवंश्यः । पितुर्नाम वेङ्कटाचार्यः । माता तातम्बा । बाल्ये पितुस्सकाशादेव आरम्भ-शिक्षणादि । अल्प एव काले जातपितृवियोगः उपरितनशिक्षणार्थं मात्रा सह प्रसिद्धमैसूरुनगरमागच्छत् । नवद्वीपादेव प्राप्तनवीनन्यायशास्त्र-शिक्षणाः सुप्रसिद्धाः सन्ततानुगृहीतछात्रसन्ततयः पण्डितरत्नं कस्तूरि-रङ्गाचार्याः एतेषां विद्यागुरवः । गुरुशिष्ययोः सौहार्दमादर्शप्रायमभूत् । न्यायवेदान्तशास्त्रविद्वान् अयम् आरम्भे प्राच्यविद्यासंशोधनालये (Oriental Research Institute) संशोधकपण्डितस्थाने नियुक्तः, निर्मत्सरतया श्रीकण्ठभाष्यादीन् बहून् ग्रन्थान् प्रकाशयामास ।

अत्यपूर्वग्रन्थसङ्ग्रहालयस्थितत्वात् बहूनां ग्रन्थानामध्ययनेन सर्वेष्वपि दर्शनेषु अनितरसाधारणपरिपक्वज्ञानसम्पादनसौलभ्यमभूदस्य श्रीनिवासा-चार्यस्य दूरीकृतालस्यस्याचिरादेव । महामेधावित्वात् दर्शनानामभिप्राया-न्वेषणे नूतना दृष्टिस्समजनि अस्य, यस्यैव फलं 'दर्शनोदय' नामात्यद्भु-तोऽपूर्वो ग्रन्थः कालान्तरे । न केवलं संशोधनसरण्याम् अपि तु बोधन-सरण्यामप्यस्यासाधारणं कौशलं सर्वाकर्षकमभूत् । तेन चास्य महाराज

संस्कृतमहापाठशालायां विशिष्टाद्वैतवेदान्तप्राध्यापकस्थानावाप्तिः, आंग्ल महाराजकालेजस्थानेऽपि दर्शनाध्यापकपदावाप्तिश्च । सर्वसिद्धान्तसौहार्द-दृष्टिमस्य सामान्यतः पण्डितजनदुर्लभामवलोक्य, श्रीरामकृष्णमठेऽपि दर्शनाध्यापकपदव्यामयं नियुक्तः सर्वजनादरणपात्रमभूत् ।

सुप्रसिद्धः दार्शनिकः डा. राधाकृष्णमहोदयः, प्रो. हिरियण्णः इत्यादयः एतेषामविच्छिन्नभक्ता अभूवन् । क्रमशः एते श्रीमन्महाराज श्रीकृष्णराजसार्वभौमकृपापात्रमप्यभूवन् । महाराजैः पण्डितरत्नबिरुद-दानम्, महामहोपाध्यायबिरुददापनं च तत्फलमभूत् । एवमेते स्वीय-सौहार्दविशालदृष्ट्यादिभिः यशसः अत्युच्छ्रये स्थाने तदा विरेजुः ।

एतादृशमसाधारणं कौशलमेतेषां कथमभूदित्यत्र दर्शनोदयारम्भे—विमर्शकानां सर्वत्र तटस्थदृष्टिरावश्यकीति केवलं न पर्याप्तम् । किन्तु

शमार्थं सर्वशास्त्राणि विहितानि मनोषिभिः ।
स एव सर्वशास्त्रज्ञः यस्य शान्तं मनस्सदा ॥

इति महाभारतवचनमुदाहरन्त एते मनसः अनुपप्लवमेव सर्वशास्त्राध्ययन-फलं प्रदर्शयन्ति । न तावन्मात्रम्, किन्तु "यस्य मनः सदा शान्तम्, स एव सर्वशास्त्रज्ञः भवेत्" इति उद्देश्यविधेयभावपरिवर्तनेन योजयन्ति तं श्लोकम् । यदि च पूर्वग्रहदूषितमनस्काः परमतं पश्येयुः, तदा—

"दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते" इति भट्टकुमारिल-वचनविषया एव ते भवेयुरित्यपि दृढमभिप्रयन्त्येते । निदर्शनार्थं किञ्चिदिव प्रदर्श्यते । शिवस्येव विष्णोरपि लिङ्गमूर्त्या पूजनादिकं प्रसिद्धपाञ्चरात्र-संहितास्थमपि, शतसहस्रवारं तत्र कृतपरिश्रमस्य विदुषः न दृष्टि-गोचरोऽभूत् । श्रीमद्भागवते एकादशस्कन्धे द्वाविंशाध्याये—

'कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो ।' इति 'ऋषीणां वाक्येष्यपि यदि वैविध्यम्, वयं किं कुर्मः ।' इति उद्धवप्रश्नस्योत्तरं दित्सन् भगवान्, स्वयं पूर्वपक्षं विस्तरेण दृढीकृत्य,

इति नाना प्रसंख्यानं तत्त्वानामृषिभिः कृतम् ।
सर्वं न्याय्यं युक्तिमत्त्वात् 'विदुषां किमशोभनम्' ॥

इति दृष्टिभेदमात्रम्, न तत्त्वभेदः इति स्पष्टयति। तत्र 'विदुषां किमशोभनम्' इति वदन् भगवान्, अविदुषामेव अशोभनम्; अज्ञत्वादेवेत्यपि स्पष्टयति।

न केवलं दार्शनिकविषयेषु, अन्येष्वपि बहुषु क्षेत्रेषु एतेषां दृष्टिरुदारा प्रसरति स्मेत्यपि अवगम्यते। सतोपद्धतौ, विधवाविवाहे, विधवामुण्डने, अस्पृश्यतायाम्, एवमन्येष्वपि सामाजिकविषयेषु स्वीयामसाधारणीं प्रतिभां प्रदर्शयन्त एते लघून् प्रबन्धान् बहून् प्रकाशयामासुः। तेन च साम्प्रदायिकजडविदुषां कोपपात्रमप्यभूवन्नेते। अथापि मृगराज इवेतरानगणयन्तः स्वीयां प्रामाणिकीं प्रवृत्तिं न कदापि तत्यजुः। तथैव ज्यौतिषे 'उपरागमोमांसा' नामकं ग्रन्थमपि स्वीयदृष्ट्यैव संशोध्य प्रकाशयामासुः।

एतेषां स्वीयविद्यागुरुषु कियती भक्तिरभूदतिशयितेत्यत्र इदमेव निदर्शनम्। श्रीकस्तूरिरङ्गाचार्याणां पुत्रः श्रीश्रीनिवासरङ्गाचार्यनामा आसीत्। स तु लोकप्रवादानुगुणमेव न तावान् शास्त्रपण्डितोऽभूत्। तस्य कथञ्चित् न्यायवेदान्तयोः विद्वत्पदवी प्रापिता अनेनाचार्येण। श्रीकस्तूरिरङ्गाचार्यास्तु प्रथम एव वयसि परं धाम ययुः। गृहकृत्यभारः पुत्रस्य श्रीनिवासरङ्गाचार्यस्य शिरस्यपतत्। तदानीं शास्त्रद्वयेऽपि प्रौढपाण्डित्यस्याभावात् तत्क्षेत्रे तस्य जोविकाकल्पनमतीवाशक्यमभूत् प्रामाणिकानामेतेषाम्। तदानीं स्वोयासाधारणप्रभावात् पाञ्चरात्रवैखानसागमयोः शिक्षणव्यवस्थायै स्थानादिकं परिकल्प्य, पाञ्चरात्रप्राध्यापकस्थाने श्रीनिवासरङ्गाचार्यम्, वैखानसप्राध्यापकस्थाने स्वोयमन्यं शिष्यं श्रीतिरुमलाचार्यं च नियुज्यात्मान कृतकृत्यं मेनिर एते उदारपुरुषाः। अन्तिमकालपर्यन्तमेते एकयैव रीत्या विरेजुः सर्वमान्याः। क्रैस्ते 1938 संवत्सरे अल्पेनैव व्याजेन परं धाम ययुः॥

एतेषां रचनाः बह्व्योऽपि प्राधान्येन—

(१) दर्शनोदयः
(२) मानमेयरहस्यश्लोकवार्तिकम् ।
(३) शाबरभाष्यभूषणम् ।
(४) श्रीभाष्यभूषणम्
(५) रहस्यत्रयसारः (संस्कृते)

इत्यादयः गणनामर्हन्ति । एवमेतेषां विशालं पाण्डित्यं संस्कृतक्षेत्रमात्र-विश्रान्तं मा भूदिति मन्वानैः मैसूरुविश्वविद्यालयाधिकारिभिः प्रार्थितैः एतैः 'हिन्दूदर्शनसार' नाम्ना कर्णाटकभाषायाम् अत्यद्भुतः, संक्षिप्तोऽपि सकल-विषयगर्भः ग्रन्थो व्यरचि, योऽयमद्यापि दर्शनमर्मजिज्ञासूनामाधारभूततया विराजते ।

अद्वैतसिद्धान्ते साधनस्य स्थानम्

शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया ।
किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥

नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥

इह खलु संसारसागरेऽपारे चिरेण सततं परिभ्रमतां सकलजीवनिकायानां समुद्धरणहेतुः—विशेषतो मानवानां सर्गादौ परमपुरुषनिःश्वसितवदाविर्भूतेभ्यो वेदेभ्योऽधिगतो—धर्मः । स च साक्षादभ्युदयनिःश्रेयसहेतुः । द्विविधश्च सः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च । सः जगतः स्थितिकारणम्, ब्राह्मणादिवर्णिनः ब्रह्मचर्याद्याश्रमानुद्दिश्य विहितः । प्रवृत्तिलक्षणो हि पशुपुत्रकलत्रादिकामानामिह अभ्युदयहेतुः धर्मः यज्ञदानतपःस्वाध्यायादिः । परत्र च देवलोकपितृलोकप्राप्तिहेतुः । स एव फलाभिसन्धिवर्जितोऽनुष्ठीयमानो मोक्षहेतुरपि भवति, परन्तु न साक्षात् ।

भगवत्पादैः गीताभाष्यारम्भे इत्थमेव उपवर्णितः—अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णान् आश्रमांश्च उद्दिश्य विहितः स देवादिस्थानप्राप्तिहेतुरपि सन् ईश्वरार्पणबुद्ध्या अनुष्ठीयमानः सत्वशुद्धये भवति फलाभिसन्धिवर्जितः । शुद्धसत्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते । तथा च इममर्थमभिसन्धाय वक्ष्यति—"ब्रह्मण्याधाय कर्माणि ।" "योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये" इति ।

तत्र निवृत्तिलक्षणो धर्मः—ज्ञानवैराग्यादिलक्षणः सनकसनन्दनादिभिः गृहीतः साक्षादेव निःश्रेयसहेतुः । परं निःश्रेयसं मोक्षापरनामधेयं अविद्याकामकर्महेतुकस्य संसारस्य अत्यन्तोपरमलक्षणं नित्यशुद्धबुद्धमुक्तस्वभावस्य

सच्चिदानन्दरूपस्य परब्रह्मणः स्वरूपावाप्तिलक्षणं च तत्। एवमुक्तो द्विविधो धर्मः, साधनं संक्षेपतः।

अद्वैतसिद्धान्तो नाम—"ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति सुप्रथितोऽयम्, कथमयमर्थो लब्धः ?

सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोऽभावात्।
नह्यन्यदस्ति किञ्चित् सम्यक् परमार्थतत्त्वबोधे हि॥

इति विवेकचूडामणौ आचार्याः। न विद्यते द्वैतं यत्र तत् अद्वैतम्। प्रत्यक्षादिप्रमाणैः प्रतीयमानमपि जगदिदं सर्वं द्वैतं सम्यज्ज्ञाने "अहमस्मि परं ब्रह्म" "वासुदेवः सर्वं" "इदं सर्वं यदयमात्मे"ति श्रुतिस्मृत्युद्घोषित-रीत्या साक्षादनुभवरूपे समुदिते, सद्वस्तुनः सच्चिदानन्दरूपाद् ब्रह्मणः परं किञ्चिदपि नास्तीति बुद्धिः यत्र जायते तदेतदद्वैतं प्रत्यगभिन्नं ब्रह्मैव। तथा च "अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते" इति गौडपादोक्तरीत्या "शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" इति माण्डूक्य-श्रुत्या च सर्वदा शान्तं सर्वोपप्लवरहितं निर्विकल्पमवस्थात्रयातीतं शिवं मङ्गलं तुरीयं ब्रह्मविदो यन्मन्यन्ते स एवाऽत्मा तत्त्वतो मुमुक्षुभिरवश्यं ज्ञेय इत्यवगम्यते।

अन्यथापि निरुक्तमद्वैतपदं सुरेश्वराचार्यैः—

द्विधेतं द्वीतमित्याहुः तद्भावो द्वैतमुच्यते।
तन्निषेधेन चाद्वैतं प्रत्यग्वस्त्वभिधीयते॥ इति।

एकमेवाद्वितीयमपि ब्रह्म, एकोऽपि चन्द्रः सद्वितीय इव द्विधा अनेकधा इतं-प्रतीतं अज्ञानवशात्=द्वीतं-तस्य भावो द्वैतं जगद्भेदः, तस्य नेति नेतीति निषेधेन द्वैतरहितं वस्तु परमार्थं प्रत्यगाख्यं तत्पदेनाभिधीयत इति वार्ति-कार्थः। असज्जडदुःखात्मकस्य जगतो द्वैतस्य भोग्यभोक्तृजातस्य प्रति-प्रातिकूल्येन सच्चिदानन्दरूपेण यः अञ्चति-प्रकाशते स एव प्रत्यक्

परमात्मा ; ईदृशात्मानुभवे जाते प्रागुक्त अद्वैतसिद्धान्तः सर्वसंमतो भवति, श्रुति-युक्ति-अनुभूतिभ्यः स सिद्ध्यत्येव ।

अस्मिन् सिद्धान्ते साधनस्य स्थानमिदानीं चिन्त्यते । एवं निरुक्ताद्वैतजब्रह्मात्मज्ञानं मुमुक्षूणां साक्षान्मोक्षसाधनं, न ज्ञानादन्यन्मोक्षसाधनमस्ति । 'तमेव विदित्वाऽतिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाये'ति श्रुतेः । कर्म तु चित्तशुद्धये, उपासनं च उपात्तदुरितक्षयार्थं चित्तैकाग्र्यहेतुः । "चित्तस्य शुद्धये कर्म न च वस्तूपलब्धये । वस्तुसिद्धिर्विचारेण न किञ्चित् कर्मकोटिभिः" इति भगवत्पादाः । अविद्यामूलको हि बन्धः, तन्निवृत्तिश्च मोक्षः । ज्ञानमेव अविद्यानिवर्तकं तमस इव प्रदीपः । न खलु जडभूतमाविद्यकं कर्म निवर्तकं भवति । न हि तमः तमसो निवर्तकं भवति । उपासनं नाम ध्यानापरनाम । ध्यानं नाम मानसी क्रिया । यथाशास्त्रं सगुणसाकारादिदेवताध्यानं, विजातीयप्रत्ययान्तरातिरस्कृतः सजातीयप्रत्ययप्रवाहः तैलधारावदविच्छिन्नो यः स ध्यानमिति कथ्यते । ध्यानस्य कल्पितरूपेणापि संभवः । "वाचं धेनुमुपासीत" 'आदित्यो ब्रह्मेत्यादेशः' इति वाग्धेनूपासनवत्, आदित्यो ब्रह्मेत्युपासनवत् । सम्यज्ज्ञानस्य तु तात्त्विकवस्तुविषयकत्वमेव अग्नौ अग्निबुद्धिवत् । अतो ध्यानं न सम्यज्ज्ञानम् । अतोऽपि तत्त्वाज्ञानस्य न निवर्तकम् । अतः कर्म वा ध्यानं वा तत्त्वज्ञाने जननीये परंपरया सत्त्वशुद्धि-वैराग्यादिसंपत्ति-ज्ञाननिष्ठाजननयोग्यताद्वारा कारणं भवति । सर्वमपि वर्णाश्रमधर्मानुष्ठानमित्थमेव ज्ञाने बहिरङ्गसाधनं भवति । अयमेव गीतायां कर्मयोग इत्युच्यते । योगार्थत्वात् निष्कामकर्माऽपि योग इत्युच्यते कर्मस्वधिककृतानाम् । कर्मयोगः ध्यानयोगपदमारुरुक्षोः पुरुषस्य प्रथमं सोपानम् ।

'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥

इति भगवान् उपदिशति । ध्यानयोगारूढस्य तु शमः=सकलकर्मोपरतिः संन्यासः कारणं तत्त्वज्ञाने जननीये ध्याने च । अधिकारिभेदेन साधनभेदः प्रदर्शितः—'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' । अत्र योगिनां—कर्मयोगिनामित्यर्थः ।

सर्वाण्यपि साधनानि आत्मतत्त्वाग्रहणदशायां, क्रियाकारकादिद्वैतस्य, जीवेश्वरादिभेदस्य सर्वस्यापि तत्त्वज्ञानं विना मिथ्यात्वबुद्धेरनुदयात्, स्वाभाविकसत्यबुद्धेः सत्त्वात् तदैव अनुष्ठेयानि । 'ज्ञाते द्वैतं न विद्यते' इति गौडपादोक्तदिशा अद्वितीयब्रह्मज्ञानोत्तरं न साधनं किञ्चिदप्यस्ति । "नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन" इति भगवतैव कृतार्थस्य ज्ञानिनः अनुष्ठितकर्मणो निष्फलत्वस्य, अकरणे प्रत्यवायाभावस्य च बोधनात् । इत्थं च जिज्ञासोः साधकस्य तत्त्वज्ञानार्थं साधनमावश्यकम् । तत्त्वज्ञानोदये कानिचन सहकारिसाधनानि गीतायामेव त्रयोदशेऽध्याये भगवता उपदिष्टानि—

अमानित्वमदंभित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तं अज्ञानं यदतोऽन्यथा ॥

अत्र अमानित्वादीनि ज्ञानसाधनानि । 'एतज्ज्ञानम्' इति तेषु ज्ञानसाधनेषु 'लाङ्गलं जीवनम्' इतिवत् कारणे कार्याभेदव्यवहारः औपचारिकः । एतद्भिन्नानि मानित्वादीनि ज्ञानसाधनानि न भवेयुः । अपि तु ज्ञानविरोधीनि । अज्ञानमित्यपि पूर्ववत् तेषु अभेदव्यवहारः औपचारिकः । अमानित्वं—कुलधनविद्यादिभिः स्वाभिमानेन आत्मनः श्लाघनं मानित्वं यत् तदभावः । दंभित्वं–स्वधर्मप्रकटीकरणं, तदभावः अदंभित्वम् । अहिंसनं— कदाचिदपि केनापि निमित्तेन प्राणिहिंसाकरणाभावः । क्षान्तिः—क्षमा, परेण अपराधे कृतेऽपि सहनं —निर्विकारस्थितिः । यथा युधिष्ठिरस्य क्षमा । कृतापराधेऽपि दुर्योधने कदाचित् गन्धर्वेण गृहीते तन्मोचनाय अर्जुनं प्रेरयन् क्षमां दर्शितवान् । एवं विषदानाग्निदानादिभिः बहुभिरपराद्धेष्वपि कौरवेषु क्षमा युधिष्ठिरस्य, तद्वत् जिज्ञासोः क्षमा आवश्यकी । आर्जवं–ऋजुस्वभावः, 'मनस्येकं वचस्येकं कर्मण्येकं सदात्मना' मिति सुभाषितवत् त्रिकरणशुद्धिः अमायया वर्तनम् । आचार्योपासनं-मोक्षसाधनोपदेशकर्तुः ब्रह्मनिष्ठस्य आचार्यस्य शुश्रूषा-गीतायां-'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया' इति भगवता उपदिष्टैव । शौचम्–अन्तर्बहिः शुचित्वम्, स्नानादिना देहस्य शुद्धीकरणमन्तःशुचित्वे कारणमेवं त्रिकालस्नानं विहितम् । रागद्वेषाद्यकरणमन्तःशुचित्वमन्यदस्त्येव । मनसः प्रतिपक्षभावनया रागादिदोषापनयनम् । स्थैर्यं—मोक्षमार्गे निश्चितव्यवसायः । आत्मविनिग्रहः—देहेन्द्रियादेः स्वाभाविकनिषिद्धप्रवृत्तिनिरोधः । अन्तर्बहिरिन्द्रियनिग्रहः —शमदमतितिक्षादिः । युक्ताहारविहारिता, युक्तचेष्टा युक्तस्वप्नावबोधश्च योगहेतुः । इन्द्रियार्थेषु वैराग्यं— इहामुत्रार्थभोगेषु तीव्रवैराग्यं शुकमुनेरिव, बुद्धस्येव आवश्यकम् । अनहंकारः—सर्वत्र अहंकारवर्जनम् । जन्ममृत्युजराव्याधिषु तत्प्रयुक्तेषु दुःखेषु-दोषदर्शनम् । जननादयः सर्वे दुःखकरा इति नित्यं दोषदर्शनम् । इदमपि तीव्रवैराग्यहेतुः बुद्धवत् । नित्यं च समचित्तत्वम् - इष्टोपपत्तिषु

अनिष्टोपपत्तिषु च गंभीरतया स्थितिः । चित्तस्य 'दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः' इति स्थितप्रज्ञलक्षणमुक्तं, तदेव साधनं साधकस्य । समचित्तत्वं - जनकमहाराजेन कृतातिथ्यस्यापि शुकमुनेः तदीयभोगेषु रागानुत्पत्तिः । प्राक् दूरदेशतः संचारेण तीव्र-तापादिना शुकमुनेः श्रमाभावः । एतत्सर्वं महाभारते स्पष्टम् । श्रीरामस्य पट्टाभिषेके निश्चिते तन्निरोधेन अरण्यवासे प्राप्तेऽपि गंभीरतया समचित्तत्वं सुविदितमेव । तद्वत् तत्त्वजिज्ञासोः साधनमिदम् । 'असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।' असक्तिः— प्रीत्यभावः। अनभिष्वङ्गो नाम आसक्तिविशेषः अनन्यात्मभावरूपः । पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति, अन्यस्मिन् सुखिनि दुःखिनि वा अहमेव सुखो दुःखी, जीवति जीवामि, मृते मरिष्यामि इति गृहस्थस्य संसारिणो यादृशाभिमानप्रयुक्ता आसक्तिः अभिष्वङ्गः, तदभाव एव अनभिष्वङ्गः। 'मिथिलायां प्रदीप्तायां न मे किञ्चन दह्यते' इति जनकोक्तिवत् ममतास्पदेषु कुत्रचिदपि आसक्तिशून्यता । मयि च—वासुदेवे परमात्मानि, अनन्ययोगेन भक्तिः अव्यभिचारिणी— अनन्ययोगः वासुदेवात् परो नास्ति, स एव नो गतिरिति अव्यभिचारिणो बुद्धिः । उक्तेन अनन्ययोगेन भजनं भक्तिः । सा च अव्यभिचारिणी नित्या । सेयं ज्ञानसाधनम् । विविक्तदेशसेवित्वं—अरण्यनदीपुलिन-देवालयादिषु विविक्तदेशेषु निवासशीलत्वम् । अथवा यत्रैकाग्रता संभवति तत्र निवासकरणशीलता । अध्यात्मज्ञाननित्यत्वम्—आत्मादिविषयज्ञानं नित्यं यत् । जनानां—प्राकृतानां संस्कारहीनानां अविनीतानां च संसदि अरतिः—अरमणम् । विनीतानां संस्कृतमनसां तु संसदि रतिरावश्यकी । तस्या ज्ञानोपकारकत्वात् । तत्त्वज्ञानार्थदर्शनम्—अमानित्वादिसाधन-परिपाकवशात् जायमानं तत्त्वज्ञानं, तस्य अर्थः— फलं=मोक्षः, तद्दर्शनं तदालोचनम्, तदालोचने सति साधनानुष्ठाने प्रवृत्तिस्स्यादिति, एतानि

अमानित्वादीनि ज्ञानसाधनानि, तद्विरुद्धानि मानित्वादीनि तु सर्वाणि ज्ञानासाधकत्वात् मुमुक्षुभिः यतिभिः सर्वथा त्याज्यानि इत्येवं भाष्यरीत्या गीतार्थो वर्णितः ।

इतः परं उक्तसाधनेषु भक्तिविषये विस्तरेण—अर्थविस्तरेणापि—किञ्चिदुपवर्ण्यते । का नाम भक्तिः ? किंस्वरूपा, कतिविधा चेति चिन्त्यते । गुरुदेवतादौ निधीयमाना प्रीतिः भक्तिः । भागवते—

'या प्रीतिरविवेकानां विषये त्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥ इति ।

अविवेकिनां भोगविषयेषु—स्रक्-चन्दन-वनितादिषु विद्यमाना दृढतरा प्रीतिर्या वर्तते, सैव वासुदेवमनुचिन्तयतः प्रीतिः—न जातु हृदयात् हरिः मापसर्पतु इति प्रार्थयतः— अहेतुकी अप्रतिहता च भक्तिरित्युच्यते । एतादृशी भक्तिः चतुर्विधेति गीताया अवगम्यते—

चतुर्विधा भजन्ते मां नराः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥

इति आर्तादिचतुर्विधभक्तनिष्ठतया भक्तिरपि चतुर्विधा भवति । साधनीभूता भक्तिः आर्ते, अर्थार्थिनि, तत्त्वजिज्ञासौ च वर्तते । तत्साध्या भक्तिः ज्ञाननिष्ठालक्षणा भक्तिः । 'स्वात्मानुभवरूपेण यदवस्थानं सा परा ज्ञाननिष्ठा उच्यते । सेयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरुक्ता । तथा भगवन्तं तत्त्वतः अभिजानाति तदनन्तरमेव विशत' इति गीताभाष्ये (अ-15) आचार्याः प्रदर्शयन्ति । तत्त्वजिज्ञासुभिः प्रीतिविशेषेण यत् श्रवणमनननिदिध्यासनं क्रियते, सैव अनन्ययोगेन क्रियमाणा भक्तिर्भजनम् । एतादृशप्रीत्यतिशयवशात् अमानित्वादिभिश्च संपद्यमाना साध्या भक्तिः ज्ञानलक्षणा ज्ञानिनि विद्यमाना साक्षात्कारवृत्तिरूपा प्रत्यगभिन्नब्रह्मविषयिणी भवति । आर्तादित्रयाणां तत्त्व-

ज्ञानाभावात् स्वस्य परमात्मनश्च भेदो वर्तते। 'ज्ञानी त्वात्मैव मे मतम्' इति भगवदुक्त्या, 'ब्रह्मवित् ब्रह्मैव भवति' इति श्रुत्या च तत्त्वज्ञानिनो नास्ति भेदः परमात्मन इत्यवगम्यते।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्॥

इति। 'एवंभूतो ज्ञाननिष्ठः मद्भक्तिं मयि परमेश्वरे भक्तिं परामुत्तमां ज्ञानलक्षणां चतुर्थीं लभते' इति अत्र भाष्यम्। ज्ञानोत्तरं भजनीयं किमपि नास्ति। किं भजनीयं, केन भजनीयं, कथं वा भजनम्? 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्, केन कं विजानीयात्' इति क्रियाकारकादिभेदजातं सर्वमात्मतया पश्यति ब्रह्मविदिति कारणात्।

अन्यदपि प्रीतिपूर्वकं भजनं भक्तिरिति। तच्च कायेन वाचा मनसा वा निष्पाद्य भजनीयदेवस्य तुष्टिहेतुर्व्यापारविशेषः। सा भक्तिः नवविधा— 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इति। संसारमण्डले आर्तस्य चोरव्याघ्रादिपीडितस्य आध्यात्मिकादितापत्रयनिवृत्त्यर्थं विष्णोरवतारचरितस्य श्रवणं, तन्नाम-कीर्तनं—विष्णुसहस्रनामपठनं, विष्णोः मनसा स्मरणं, तदीयमूर्तेः पादसेवनं, पुष्पफलादिभिरर्चनं पञ्चोपचारषोडशोपचाराद्यन्यतमात्मकं, कायेन साष्टाङ्ग-प्रणामकरणं; वाचा मनसा वा वन्दनं, दास्य-दासवत् सर्वथा सेवाकरणम्; विष्णुप्रीतिफलकं सर्वकर्मानुष्ठानम्। तदपि त्रिविधं भवति। उपात्त-दुरितक्षयार्थं, तत्प्रीत्यर्थम्। किमपि फलमनुद्दिश्य केवलमाज्ञामात्रमिति भावेन सन्ध्यादिकर्मानुष्ठानं नित्यनैमित्तिककर्मानुष्ठानं सर्वं सात्त्विकं ग्राह्यं भवति। "कर्मनिर्हारमुद्दिश्य परस्मै वा तदर्पणम्। यजेद् यष्टव्यमिति वा पृथग्-भावः स सात्त्विकः।" कर्मनिर्हारः-आत्यन्तिककर्मनिर्हारः-पापक्षयः। परस्मै विष्णवे अर्पणम् "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि

कौन्तेय तत्कुरुष्व मदर्पणम्" । इदं सर्वं निष्कामकर्म भवति 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति गीता च । ईदृशं कर्म चित्तशुद्ध्यादि-करणद्वारा तत्त्वज्ञानजननेन मोक्षं प्रत्यपि हेतुः । "कर्मणैव हि संसिद्धिं आस्थिता जनकादयः" इति गीतया जनकादीनां कर्मणा चित्तशुद्धिद्वारा क्रमेण ज्ञानसिद्धिः, तेन मोक्षसिद्धिश्च वर्णिता ।

दास्यमन्यदपि मातापित्रादीनां विष्णुबुद्ध्या दासवत् शुश्रूषणमपि । इत्थमन्यैर्व्याख्यातमस्ति । एतदपि युज्यते—"मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भवेति श्रुतिशासनमप्यस्ति । माता-पितृ-आचार्यातिथिषु देवभावेन भक्तिपूर्वकं निषेवणं, निष्कामं श्रेयोनिदानं भवत्येव ।

सख्यं—प्रेमविशेषरूपम् । यथा मित्रे तथा विष्णौ, यथा मित्राय अपेक्षितं भक्ष्यादिकमपि स्नेहेन दीयते, तथा प्रेमपूर्वकं विष्णवे निवेद्यते । मित्रस्य दूषणादिकमन्येन क्रियमाणमपि सोढुं न पार्यते, तथा विष्णो-र्दूषणं नास्तिकैः क्रियमाणं सोढुं न शक्यते । मित्रकार्यं स्वकीयकर्मवच्च क्रियते, तथा विष्णुकार्यं स्वकीयमिति प्रेमातिशयेन कार्यं कर्तव्यम् । एतदेव सख्यम् ।

आत्मनिवेदनम्—स्वकीयशरीरादियोगक्षेमचिन्तायामभिनिवेशं विनैव आत्मनिवेदनम् ।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

"अनन्याः अपृथग्भूताः परं देवं नारायणं आत्मत्वेन गताः=चिन्तयन्तो ये जनाः सन्यासिनः पर्युपासते—तेषां परमार्थदर्शिनां सतताभियोगिनां योगक्षेमं वहाम्यहम्" इति भाष्यमत्र । इयमन्तिमा भक्तिरन्यत्रापि

आचार्यैः—

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।
स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ।
स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः ॥

इति विवेकचूडामणौ दर्शिता । अत्र स्वस्वरूपानुसन्धानं निदिध्यासनं, तस्यैव साक्षात्कारं प्रति साक्षात् साधनत्वात् । महावाक्यश्रुतार्थस्य ब्रह्मात्मैक्यस्यानुसन्धानं–तद्भावनाधारा विजातीयप्रत्ययातिरस्कृता सजातीयप्रत्ययप्रवाहरूपा साक्षात्कारेऽसाधारणं कारणम् । शमादिगुणानां मध्ये इयमेव मुख्यसाधनम् । इदं निर्गुणविषयम् । स्वात्मतत्त्वानुसन्धानं–स्वस्य तत्त्वतः ईश्वरेण भेदसत्वेऽपि अभेदेनोपासनं– अहंग्रहोपासनं सोऽहमित्येवं भक्तिरित्यन्येषां मतम् । इयं तु सगुणेश्वरविषये, भेदबुद्धिपुरःसराया भ्रान्तिरूपायाः अस्याः मुख्यभक्तित्वं नास्तीति अपरे जगुरिति सूचितम् । इत्थं परमगुरुभिः श्रीचन्द्रशेखरभारतीश्रीचरणैः व्याख्यातम् । इत्थं नवविधा भक्तिरपि सगुणनिर्गुणविषयिणी यथौचित्यं तत्तदधिकारिभेदेन ग्रहीतुमुचिता ।

सगुणेश्वरोपासनेन सत्यलोकप्राप्तिद्वारा तत्रैव कल्पान्ते मुमुक्षूणां ब्रह्मणा सह तत्त्वज्ञानेन मुक्तिर्भविता । ‘‘परस्यान्ते कृतात्मानः प्रविशन्ति परं पदं’ इति वचनात् सेयं क्रममुक्तिः, उक्तनिदिध्यासनं कृतवतां निर्गुणावलम्बिनामत्रैव ब्रह्मात्मैक्यसाक्षात्कारेण मुक्तिरिति सैव जीवन्मुक्तिः ‘अत्र ब्रह्म समश्नुते’ इति श्रुतेरवगन्तव्यम् ।

इत्थं निष्कामकर्म, सगुणेश्वरोपासनं निर्गुणब्रह्मात्मैक्यानुसन्धानम् इति क्रमेण साक्षाद्वा अद्वैतसिद्धान्ते तत्त्वसाक्षात्कारजनने साधनं भवति । तेन च निःश्रेयससिद्धिरिति विस्तरभिया लेखनाद्विरम्यते । यथोचितं यथामति निरूपितमिदं विपश्चिद्भिः गुणपक्षपातिभिः पुरस्क्रियतामिति निवेदयामः ।

निपातघटितवाक्येषु शाब्दबोधविचारः

'प्राग्रीश्वरान्निपाताः' [पा. सू. १-४-५६] इति पाणिनिसूत्रेण केषाञ्चन शब्दानां निपातसंज्ञा विधीयते। सर्वे निपाता अव्ययेष्वन्तर्भवन्ति, 'स्वरादिनिपातमव्ययम्' [पा.सू. १-१-३७] इति सूत्रेण तेषामव्ययसंज्ञाविधानात्। निपातानामनल्पत्वात् प्रधानानामेव केषाञ्चिद्योगे शाब्दबोधप्रकारोऽत्र चिन्त्यते। एतद्घटितवाक्येभ्यो जायमानशाब्दबोधप्रकारे निपातप्रयुक्तं यद्वैलक्षण्यं तन्मात्रप्रदर्शनार्थमयमुद्यमो, न तु समग्रवाक्यजन्यस्य शाब्दबोधस्वरूपस्य प्रदर्शने, तस्य प्रकृतेऽनुद्दिष्टत्वात्। सह, विना—इत्यादीनामव्ययानां केषाञ्चित् निपातसंज्ञाभावेऽपि तद्घटितवाक्येषु शाब्दबोधप्रकारोऽत्र प्रसङ्गाद्विचार्यते, समानयोगक्षेमत्वात् तदर्थान्वयस्य। विचारश्च प्रायेण वैयाकरणमतानुरोधेन। यद्यपि वैयाकरणमते निपातानां द्योतकत्वाङ्गीकारात् सर्वोऽप्यर्थविशेषः समभिव्याहृतपदानामेवेति द्योत्यार्थस्य अन्वयप्रसङ्गो नास्ति, तथापि सोऽयमर्थविशेषः कुत्र कुत्र केन रूपेण भासते इत्यवबोधार्थं तद्विचारः प्रवर्तितः शास्त्रकारैः।

१. अथ नञर्थः।

अत्र पक्षद्वयम्। आरोपो नञर्थ इत्येकः पक्षः। अभावस्तदर्थ इति द्वितीयः। आरोपो नाम तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकप्रतीतिः। तदभाववति तत्प्रकारकं ज्ञानमिति यावत्। न चायं भ्रमः। आहार्यत्वात्। 'अब्राह्मण' इति नञ्समासे आरोपो नञर्थः। विषयत्वं संसर्गः। आरोपश्च समभिव्याहृतपदार्थप्रवृत्तिनिमित्ते। 'अब्राह्मण' इत्यस्य आरोपविषयब्राह्मणत्ववान् इत्यर्थः। आरोपश्च ब्राह्मणभिन्ने ब्राह्मणत्वाभाववति सम्भवतीति ब्राह्मणभिन्न इत्यर्थः पर्यवस्यति। स च मानसबोधविषयः। अत्र ब्राह्मणशब्दस्यैव आरोपितब्राह्मणत्ववान् इत्यर्थः। नञ् तु तात्पर्यग्राहक इति द्योतकत्वपक्षः। 'अब्राह्मणः क्षत्रियः' इत्यत्र

आरोपितब्राह्मणत्ववदभिन्नः क्षत्रियः इति शाब्दबोधः। ब्राह्मणत्वाभाववति ब्राह्मणत्वस्यारोपेऽपि शाब्दबोधो भवत्येव। शब्दजन्यज्ञाने बाधज्ञानस्य प्रतिबन्धकत्वानङ्गीकारात्। आरोपस्य नञर्थत्वे च 'आरोप्यायं क्रिया-गुणौ ततो निवर्तयति' इति नञ्सूत्रस्थभाष्यं मानम्। अत एव तत्पुरुषे उत्तरपदार्थस्य प्राधान्यमिति प्रवादो नञ्तत्पुरुषेऽपि सङ्गच्छते। अत एव च अतस्मै ब्राह्मणाय, असः शिवः इत्यादौ तदादिपदानामुपसर्जनत्वा-भावात् सर्वनामता सिद्ध्यतीति तत्प्रयुक्तकार्यं निर्बाधम्। 'प्रतीयते सम्प्रति सोऽप्यसः परैः' इति माघे प्रयोगः। यद्यपि द्योतकतापक्षे ब्राह्मणपदस्य ब्राह्मणभिन्न इत्यर्थस्वीकारेऽपि 'अब्राह्मण' इत्यत्र उत्तरपदार्थप्राधान्यं न विहन्यते, तथापि 'असः' इत्याद्यनुरोधेन आरोपो नञर्थः। द्योतकतापक्षेण तदादीनां तद्भिन्न इत्याद्यर्थस्वीकारे तु सर्वनामकार्यं न स्यात्। 'उपसर्जनीभूतास्तु न सर्वादयः' इति सर्वनामसंज्ञाभावात्। 'अतिसर्वाय देहि' इत्यत्र यथा। अत एव 'अनेकम्' इत्यत्र एकवचनं सिद्ध्यति। आरोपितैकत्वस्य सत्त्वात्। व्यस्तस्थलेऽप्येवमेव। 'घटो न पट' इत्यत्र पटे आरोपितपटत्वस्य बोधात् आरोपितपटत्ववदभिन्नो घट इति तत्समुदाय-जन्यशाब्दबोधः। पटभिन्नो घट इति बोधस्तु मानसः।

एवं तिङन्तसमभिव्याहारस्थलेऽपि नञर्थ आरोपः। तत्र धात्वर्थफल-व्यापारयोः कर्मणि कर्तरि चारोपः। घटो नास्तीत्यत्र घटे सत्ताया आरोपः। बोधस्तु आरोपिता घटाभिन्नकर्तृनिष्ठा सत्तेति। घटाभावबोधो मानसः। 'चैत्रो न गच्छति' इत्यत्र चैत्राभिन्नकर्तृनिष्ठः आरोपित-संयोगानुकूलव्यापार इति बोधः। तत्र व्यापारस्य आरोपितत्वे बोधिते तज्जन्यफलस्याप्यारोपविषयत्वं बुध्यते। एवं नञ्समभिव्याहारे आरोपित-फलव्यापारयोराश्रयत्वेन 'चैत्रस्तण्डुलं न पचति' इत्यादौ तण्डुलादेः कर्मत्वं चैत्रादेः कर्तृत्वञ्च सुलभम्। 'वायौ रूपं नास्ति' इत्यत्र रूपकर्तृक-सत्तायां वाय्वधिकरणकत्वमारोप्यते। आरोपितवाय्वधिकरणत्विका रूप-

*

कर्तृका सत्तेति बोधः। तेन वाय्वधिकरणकरूपकर्तृकसत्ताया अप्रसिद्धया कथं विशिष्टसत्तारोप इति शङ्काया नावसरः। 'ज्वरितो न भुञ्जीत' इत्यत्र आरोपितं ज्वरितकर्तृकं भोजनं प्रेरणाविषयीभूतम् इति बोधः। भोजनाभावः प्रेरणाविषयः इति तु मानसः। 'न कलञ्जं भक्षयेत्' इत्यत्राप्येवमेव। आरोपितकलञ्जभक्षणं प्रेरणाविषयीभूतमिति बोधे सति पश्चात् कलञ्जभक्षणाभावः प्रेरणाविषयः इति मानसबोधो जायते—इति। अस्मिन् पक्षे पूर्वोक्तबोधप्रकारस्य अनुभवारूढत्वाभावेन, आरोपे चानुगतकार्यकारणभावस्य दुर्वचत्वेन च द्वितीयः पक्षः आश्रीयते।

अस्मिन् पक्षे नञर्थोऽन्योन्याभावोऽत्यन्ताभावश्च। प्रागभावप्रध्वंसाभावौ न कदाचिन्नञ्द्योत्यौ। तत्र अन्योन्याभावो भेद एव। अस्मिन्नपि पक्षे मतद्वयम्। नञर्थः प्रतियोगिनि विशेषणमित्येके, विशेष्य इत्यपरे। तिङन्तसमभिव्याहारे नञर्थोऽत्यन्ताभावः, अन्यत्र तु भेदः। स च प्रतियोगिनि विशेषणमिति पक्षे 'अब्राह्मणः' इत्यत्र भेदस्य प्रतियोगितासम्बन्धेन उत्तरपदार्थेऽन्वयः। भेदप्रतियोगी ब्राह्मण इति बोधः। न च भेदप्रतियोगितायाः केवलान्वयितया घटादेरपि भेदविशिष्टत्वेन उक्तबोधो दुर्लभ इति वाच्यम्। ब्राह्मणत्वावच्छिन्नप्रतियोगितासम्बन्धेन भेदः प्रतियोगिनि विशेषणमिति स्वीकारात्। तेन सम्बन्धेन भेदविशिष्टतायाः ब्राह्मण एव सत्त्वात्। ब्राह्मणभिन्न इति बोधस्तु मानसः।

'अब्राह्मणः क्षत्रियः' इत्यत्र क्षत्रियस्य वृत्तित्वसम्बन्धेन नञर्थे भेदेऽन्वयः। भेदस्य प्रतियोगितासम्बन्धेन ब्राह्मणे। क्षत्रियवृत्तिभेदप्रतियोगी ब्राह्मण इति शाब्दधीः। निपातेतरनामार्थयोरेवाभेदान्वयनियमात्, प्रकृते नञर्थभेदस्य निपातार्थत्वेन भेदेनान्वये न दोषः। ब्राह्मणभिन्नः क्षत्रिय इति बोधस्तु मानसः। 'चैत्रो न पचति' इत्यत्र क्रियायोगेऽत्यन्ताभावो नञर्थः। स च प्रतियोगितासम्बन्धेन धात्वर्थव्यापारेऽन्वेति। चैत्रकर्तृकः विक्लित्त्यनुकूलव्यापारः अभावप्रतियोगी इति बोधः। न चैवं

पचत्यपि चैत्रे 'न पचति' इति प्रयोगापत्तिः, चैत्रकर्तृकपाकक्रियायाः मैत्रनिष्ठाभावप्रतियोगितया विषयाबाधादिति वाच्यम् । यदाश्रयः प्रतियोगी तदाश्रयोऽभावः इति लक्षणया चैत्रनिष्ठोऽभावो नञर्थ इति स्वीकारात् । उक्तस्थले चैत्रकर्तृकपाकानुकूलव्यापारः चैत्रनिष्ठाभावप्रतियोगीति बोधस्वीकारात् मैत्रनिष्ठाभावमादाय 'चैत्रो न पचति' इति न प्रयोगः । 'भूतले घटो नास्ति' इत्यत्र भूतलवृत्तिघटकर्तृका सत्ता अभावप्रतियोगिनी इति बोधः । अधिकरणस्य कर्तृकर्मद्वारा क्रियान्वय इति नियमात् । 'घटः पटो न' इत्यत्र पटवृत्तिभेदप्रतियोगी घट इति बोधः । 'अनेकस्तिष्ठति' इत्यत्र प्रतियोगितासम्बन्धेन भेदविशिष्ट एकस्तिष्ठतीति बोधः । भेदप्रतियोगी एक इति वा । अनेकपदार्थे एकत्वभेदे बोधिते सङ्ख्यान्तरविशिष्टत्वमर्थाद्गम्यते । उत्तरपदार्थप्राधान्यादेकवचनम् । 'पतन्त्यनेके जलधाविवोर्मयः' इत्यादौ तु अनेकश्च अनेकश्च अनेकश्चेत्येकशेषात् बहुवचनमुपपादनीयम् । द्वयोरेकशेषे द्विवचनं तु न, अनभिधानात् । नागेशभट्टास्तु अनेके इति बहुवचनम् असाध्वेवेत्याहुः । नञर्थस्य विशेषणत्वादेव 'अत्वं भवसि' 'अतस्मै देहि' 'असः' इत्यादौ पुरुषव्यवस्था सर्वनामकार्यादिकं च सूपपादम् । 'अत्वं भवसि' इत्यत्र भेदप्रतियोगित्वदभिन्नकर्तृकं भवनमिति बोधः ।

परन्तु पक्षेऽस्मिन् 'अघटमानय' इत्यादौ भेदप्रतियोगिनं घटमानयेत्यादिरीत्या बोधप्रकारो नानुभवारूढः । घटभिन्नमानयेत्यादिबोधस्यैव सर्वजनीनत्वात् । तस्मान्नञर्थः प्रतियोगिनि विशेष्य इति मतं सिद्धान्ते स्थितम् । प्रतियोगिनिष्ठविशेषणतानिरूपितविशेष्यताश्रयो नञर्थ इति यावत् । स च क्रियायोगेऽत्यन्ताभावः । अन्यत्र तु भेदः ।

पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ।
प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ॥

इति वृद्धोक्तौ उत्तरपदशब्दः क्रियेतरशब्दोपलक्षकः । पर्युदासो भेदः ।

प्रसज्यप्रतिषेधोऽत्यन्ताभावः। प्रसज्य=विधाय, प्रतिषेधो=निषेधः प्रसज्य-प्रतिषेधः। 'सुप्सुपा' इति समासः। 'प्रसज्यायं क्रियागुणौ ततः पश्चान्निवृत्तिं करोति' इति नञ्सूत्रे भाष्यकृतः। 'एतच्च प्रसज्यप्रतिषेध उच्यते' इति तत्रैव कैयटः। प्रसज्येति ल्यबन्तम्। अथवा प्रसज्यस्य=प्रतियोगिनि आरोप्यमाणस्य क्रियादिधर्मस्य प्रतिषेधः प्रसज्यप्रतिषेध इति षष्ठीतत्पुरुषः। यथा अन्धो न पश्यतीत्यत्र अन्धे दर्शनक्रियामारोप्य प्रतिषेधः। 'पाषाणो मृदुर्न भवति' इत्यत्र पाषाणे मार्दवगुणमारोप्य प्रतिषेधः।

एवञ्च नञ्समासे नञर्थो भेदः उत्तरपदार्थेन विशेष्यते। 'अब्राह्मणः क्षत्रियः' इत्यत्र ब्राह्मणपदार्थः प्रतियोगितया भेदेऽन्वेति। भेदश्च वृत्तित्व-सम्बन्धेन क्षत्रिये। ब्राह्मणप्रतियोगिकभेदाश्रयः क्षत्रियः इति बोधः। अथवा ब्राह्मणपदस्य तद्भिन्ने लक्षणा। नञ् तात्पर्यग्राहकः। नामार्थयो-रभेदान्वयात् ब्राह्मणभिन्नाभिन्नः क्षत्रियः इति बोधः। एवं नञो वाचकतापक्षे द्योतकतापक्षे च किञ्चिदन्योन्यवैलक्षण्यं भवतीति बोध्यम्।

तिङन्तसमभिव्याहारे सर्वत्र अत्यन्ताभावो नञर्थः। 'चैत्रो न गच्छति' इत्यत्र चैत्रकर्तृकगमनव्यापाराभाव इति बोधः। प्रकारतासम्बन्धेन नञर्थविशेष्यकशाब्दबोधं प्रति धातुजन्यव्यापारोपस्थितेः विशेष्यता-सम्बन्धेन हेतुत्वात्। 'भूतले घटो न' इत्यत्र अस्तीत्यध्याहारः। तिङन्तेन योगादत्यन्ताभावो नञर्थः। भूतलवृत्तिघटकर्तृकसत्ताया अभाव इति शाब्दधीः। अधिकरणस्य कर्तृकर्मद्वारा क्रियान्वयनियमात् भूतलस्य कर्तृभूतघटद्वारा सत्तायामन्वयो न त्वभावे। घटसत्ताया अभावे बोधिते घटाभावोऽपि बुध्यते। समनियताभावयोरैक्यात्। स्वाधिकरणवृत्त्यत्यन्ता-भावाप्रतियोगित्वे सति स्वाभाववदवृत्तित्वम् समनियतत्वम्। अधिकरणस्य भूतलस्य नञर्थाभावे साक्षादन्वयाभावेऽपि भूतलवृत्तित्वेनैवाभावः प्रतीयते, समभिव्याहारबलात्। प्रतियोगी यद्वृत्तित्वेन प्रतीयते, तद्वृत्तित्वेनैव

तदभावः प्रतीयते इत्यङ्गीकारात् । 'भूतले घटो नास्ति' इत्यत्र पूर्वोक्त-रीत्या बोधितो घटाभावः भूतलवृत्तित्वेन प्रतीयते, प्रतियोगिनो घटस्य भूतलवृत्तित्वेन प्रतीतत्वात् । 'वायौ रूपं नास्ति' इत्यत्र रूपपदस्य रूप-प्रतियोगिकात्यन्ताभावे लक्षणा । वाय्वधिकरणिका रूपाभावकर्तृका सत्तेति बोधः । अथवा वायौ रूपज्ञानमाहार्यं विकल्पात्मकम् । तद्विषयस्य रूपस्य बाह्यसत्तानिषेध इति नानुपपत्तिः ।

भावार्थककृदन्तयोगे समासेऽपि नञोऽभावोऽर्थः । अभोजनम्, अगमनम्, अपाकः इत्यादौ भोजनाभाव इत्याद्यर्थप्रतीतेः । 'एकादश्याम-भोजनम्' इत्यत्र यथा । एवमदृष्ट्वा, अकर्तुम् इत्यादावपि । क्त्वातुमुनोः भावार्थकत्वात् । एवमसन्देहः, अनुपलब्धिः, अमार्दवम्, अरूपम्, अस्पर्शः—इत्यादौ गुणयोगेऽपि । 'आरोप्य क्रियागुणौ ततो निवर्तयति' इति नञ्सूत्रस्थभाष्यात् । क्रियागुणयोः योगे सर्वत्र नञोऽभावार्थकत्व-मिति फलति ।

द्योतकत्वपक्षे कश्चिदस्ति विशेषः । 'चैत्रो न पचति' इत्यादौ धातोरेव व्यापाराभावपर्यन्तोऽर्थः । नञ् तु तात्पर्यग्राहकः । अत्र पक्षे 'चैत्रेण न पच्यते तण्डुलः' इत्यादौ धात्वर्थव्यापाराभावाश्रयत्वेन चैत्रादेः कर्तृत्वम् । तत्प्रयोज्यफलाभावाश्रयत्वेन च तण्डुलादेः कर्मत्वं सुलभम् । 'अब्राह्मण' इत्यादौ ब्राह्मणपदस्य तद्भिन्ने लक्षणा । अथवा शक्तिरेव । सर्वेषां पदानां तत्तदर्थेषु तद्भिन्नेषु च शक्तिरिति नञ्सूत्रस्थभाष्यप्रदीपोद्योते स्पष्टम् । अतस्मै, असः इत्यादौ तु 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' [पा. सू. ६-१-१३२] इति ज्ञापकात्सर्वनामसंज्ञा । असः शिवः इत्यत्र सुलोपवारणाय खलु अनञ्समासे इति विशेषणम् । एवञ्च नञ्समासे सर्वनामसंज्ञा भवतीत्यत्र ज्ञापकमेवेदम् । उत्तरपदार्थप्रधानस्तत्पुरुष इति तु प्रायिकम् । 'पूर्वकाय' इत्यादौ व्यभिचारात् । 'अनेकम्' इत्यत्र औत्सर्गिकमेकवचनमिति सङ्क्षेपः ।

यत्तु—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥

इत्युक्त्वा 'अनश्वः' इत्यादीन्युदाहरणानि प्रदर्श्यन्ते, तत्र अभावः अत्यन्ताभावः, तदन्यत्वं भेदः । उभौ प्रदर्शितावेव । अन्ये सादृश्याद-योऽर्थास्तु प्रकरणादिना गम्यमानाः न तु साक्षाद्बोध्यमानाः । एवञ्च भेदोऽभावश्च द्वयं नञर्थः । अभावश्चात्यन्ताभाव इत्युक्तमेव । 'रक्तघटे श्यामो नास्ति' इत्यत्रापि अत्यन्ताभावः प्रतीयते, न तु ध्वंसः नापि प्रागभाव इति सङ्क्षेपः ।

२. अथ एवकारार्थः ।

एवशब्दस्य अवधारणमर्थः । अवधारणं व्यवच्छेदः स त्रिविधः । अयोगव्यवच्छेदः, अन्ययोगव्यवच्छेदः, अत्यन्तायोगव्यवच्छेदश्चेति । तदुक्तम्—

अयोगमन्ययोगञ्चात्यन्तायोगमेव च ।

व्यवच्छिनत्ति धर्मस्य एवकारस्त्रिधा मतः ॥ इति ।

तत्र विशेषणसङ्गतस्यैवकारस्य अयोगव्यवच्छेदः, विशेष्यसङ्गतस्य अन्य-योगव्यवच्छेदः, क्रियासङ्गतस्य तु अत्यन्तायोगव्यवच्छेदोऽर्थ इति विभागः । योगः=सम्बन्धः, तस्य व्यवच्छेदः=प्रतिषेधः अभावः इति यावत् । अयोगव्यवच्छेदः सम्बन्धाभावाभावः । सम्बन्धश्च एवकारा भावे यः प्रतीयते स एव । शङ्खः पाण्डुर एवेत्यत्र विशेषणसङ्गतस्यैवकारस्य अयोगव्यवच्छेदोऽर्थः । पाण्डुरत्वस्य गुणस्य शङ्खे सम्बन्धः समवायः । पाण्डुरत्वस्य एवकारार्थैकदेशे सम्बन्धे, द्वितीयाभावस्य शङ्खे चान्वयः । पाण्डुरत्वसम्बन्धाभावाभाववान् शङ्ख इति बोधः । अत्र शङ्खत्वावच्छेदेन शङ्खे पाण्डुरत्वसम्बन्धः प्रतीयते । अभावस्य अभावबोधनं प्रकृतसम्बन्धं द्रढयितुम् । अत्रेदं चिन्त्यम् । पाण्डुरशब्दो गुणिवाचकः । 'गुणवचनेभ्यो

मतुपो लुगिष्टः' इति वचनात् मतुप् प्रत्ययो लुप्तः। धर्मिणि विशेषणतया उपस्थितस्य पाण्डुरत्वस्य अन्यत्र एवकारार्थे विशेषणतया अन्वयो दुर्लभः। किञ्च, एवकाराभावे पाण्डुरशङ्खयोस्तादात्म्यं प्रतीयते, न तु समवायः सम्बन्धः। तस्मात् तादात्म्याभावव्यवच्छेदोऽत्र एवकारार्थः। पाण्डुरतादात्म्याभावव्यवच्छेदवान् शङ्खः इति बोधः। व्यवच्छेदोऽभावः।

पार्थ एव धनुर्धरः।

अत्र विशेष्यसङ्गतस्यैवकारस्य अन्ययोगव्यवच्छेदः अर्थः। अन्यो भेदाश्रयः। भेदश्च समभिव्याहारमहिम्ना पार्थप्रतियोगिकः प्रतीयते। एवकारार्थैकदेशस्य व्यवच्छेदस्य (अभावस्य) आश्रयतासम्बन्धेन धनुर्धरत्वे अन्वयः। एवञ्च, पार्थप्रतियोगिकभेदाश्रयसम्बन्धाभाववद्धनुर्धरत्ववदभिन्नः पार्थ इति शाब्दबोधः। पूर्वोक्तरीत्या तु अन्यतादात्म्याभावः एवकारार्थः। पार्थान्यतादात्म्याभाववद्धनुर्धराभिन्नः पार्थ इति बोधः।

नीलं सरोजं भवत्येव।

अत्र क्रियासङ्गतस्यैवकारस्य अत्यन्तायोगव्यवच्छेदः अर्थः। अयोगे आत्यन्तिकत्वं व्यवच्छिद्यते। आत्यन्तिकत्वञ्च अन्वयितावच्छेदकव्यापकत्वम। प्रकृते च सरोजत्वमन्वयितावच्छेदकम्। सरोजानि नानावर्णानि भवन्ति, नीलानि, रक्तानि, श्वेतानि च। यद्यपि सर्वाणि सरोजानि नीलानि न, तथापि क्वचित् नीलमपि सरोजमस्त्येवेति प्रतिज्ञावाक्यमेतत्। अत्र नीलत्वादेः सरोजत्वादिसामानाधिकरण्येनान्वयः, न तु अवच्छेदकावच्छेदेन, बाधात्। अत एव अयोगे आत्यन्तिकत्वं व्यवच्छिद्यत इति पूर्वमुक्तम्। एवञ्च अयोगव्यवच्छेद एवायम्। विशेषणसङ्गतस्थले अवच्छेदकावच्छेदेन पाण्डुरत्वादेरन्वयः, अत्र तु सामानाधिकरण्येनान्वय इत्येतावता अत्यन्तायोगव्यवच्छेद इति व्यवहारः। अत्र अयोगे व्यवच्छेदे च खण्डशः शक्तिः। नीलपदार्थस्य अयोगे तादात्म्याभावे अन्वयः। धात्वर्थभवनस्य व्यवच्छेदे। एवञ्च नीलतादात्म्याभाववत्सरोज-

कर्तृकभवनाभाव इति बोधः । वस्तुतस्तु, अयोगव्यवच्छेदोऽत्र अभावाभावरूपः । धात्वर्थभवनस्य प्रतियोगितया तत्रान्वयः । नीलाभिन्नसरोजकर्तृकभवनाभावाभाव इत्येव शाब्दबोध इत्यलं विस्तरेण ।

पृथिव्यामेव गन्धः ।

अत्र अन्ययोगव्यवच्छेदः एवकारार्थः । तथा हि । सप्तम्याः अधिकरणत्वमर्थः । पृथिव्याः तत्र वृत्तित्वसम्बन्धेनान्वयः । अधिकरणत्वस्य स्वनिरूपिताधेयत्वसम्बन्धेन गन्धेऽन्वयः । एवशब्दस्य पृथिव्यन्यनिष्ठाधिकरणतानिरूपितत्वाभावोऽर्थः । सोऽयमन्ययोगव्यवच्छेदः । तस्य आश्रयतासम्बन्धेन सम्बन्धैकदेशाधेयतायामन्वयः । तथा च पृथिवीनिष्ठाधिकरणतानिरूपिता या आधेयता पृथिवीतरनिष्ठाधिकरणतानिरूपितत्वाभाववती तदाश्रयो गन्ध इति शाब्दधीः । पृथिवीतरावृत्तिः पृथिवीवृत्तिर्गन्ध इति सङ्क्षिप्तबोधाकारः ।

ननु विशेष्यसङ्गतस्यैवकारस्य अन्ययोगव्यवच्छेदोऽर्थ इति पूर्वमुक्तम् । 'पृथिव्यामेव गन्धः' इति वाक्यजबोधे पृथिव्याः विशेषणत्वेनैव प्रतीयमानत्वात् कथं तत्सङ्गतस्यैवकारस्य अन्ययोगव्यवच्छेदार्थकत्वमिति चेत्, उच्यते । तत्र 'विशेषण' पदस्य विधेयार्थकत्वम्, 'विशेष्य' पदस्य च उद्देश्यार्थकत्वं बोध्यम् । 'पृथिव्यामेव गन्धः' इत्यत्र पृथिव्याः उद्देश्यत्वम्, गन्धस्य तु विधेयत्वं प्रतीयते । ततश्च उद्देश्यगतस्यैवकारस्य अन्ययोगव्यवच्छेदोऽर्थ इति न पूर्वोक्तविरोधः । उद्देश्यताविधेयते च अतिरिक्ते एव विषयते । न तु विशेष्यताप्रकारतारूपे । अत एव 'चैत्रो गच्छति' इत्यादौ क्रियाया विधेयताप्रतीतिः ।

चैत्रस्यैवेदं धनम् ।

अत्रापि अन्ययोगव्यवच्छेदः एवकारार्थः । स्वामितानिरूपितस्वत्वं चैत्रपदोत्तरषष्ठ्या अर्थः । चैत्रेतरनिष्ठस्वामितानिरूपितत्वाभावः एवकारार्थः । अस्य आश्रयतासम्बन्धेन स्वत्वेऽन्वयः । चैत्रनिष्ठस्वामित्व-

निरूपितं चैत्रेतरनिष्ठस्वामितानिरूपितत्वाभाववच्च यत् स्वत्वं तद्वत् धनमिति शाब्दबोधः ।

अन्ये तु अवधारणं ज्ञानविशेषमाहुः । अयोगव्यवच्छेदादिकं ज्ञाने प्रकारः । अवधारणस्य विषयतासम्बन्धेन यथायथं विशेषणादिष्वन्वयः । 'अवधारणविषयपाण्डुराभिन्नः शङ्खः', 'अवधारणविषयपार्थाभिन्नो धनुर्धरः', 'नीलसरोजकर्तृकभवनमवधारणविषयः' इति शाब्दबोधः ।

लवणमेवासौ भुङ्क्ते ।

अत्र प्राचुर्यमेवकारार्थः । तस्य आश्रयतासम्बन्धेन अध्याहृतेऽन्नादावन्वयः । लवणप्राचुर्यवदन्नादिकं भुङ्क्ते इत्यर्थः ।

क्वेव भोक्ष्यसे ।

'एवे चानियोगे' इति वार्तिकात् अनवधारणमेवकारार्थः । अनवधारणमसम्भावना । यत्किञ्चिदधिकरणकत्ववत्कर्तृकभविष्यत्कालिकभोजनं सम्भावनाविषयत्वाभाववत्–इति बोधः । स्थलाभावादिना भोजनसम्भवाभावोऽत्र बोध्यते ।

३. अथ इवार्थः ।

अत्र बहवो मतभेदाः । तेषां दिङ्मात्रं प्रदर्श्यते । 'कमलमिव मुखम्' इत्यत्र इवशब्दार्थः सादृश्यम् । तच्च पदार्थान्तरम् । तद्भाने समानधर्मः प्रयोजकः इत्येके । कमलस्य निरूपितत्वसम्बन्धेन सादृश्येऽन्वयः । तस्य आश्रयतासम्बन्धेन मुखेऽन्वयः । कमलनिरूपितसादृश्याश्रयो मुखमिति बोधः । यद्वा, प्रतियोग्यनुयोगिभावेनान्वयात् कमलप्रतियोगिकसादृश्यानुयोगि मुखमिति बोधः । आह्लादकत्वाख्यः साधारणो धर्मः व्यञ्जनया बुध्यते । निपातेवार्थस्य नञर्थस्येव भेदसंसर्गेण नामार्थविशेष्यत्वे विशेषणत्वे च न दोषः । 'कमलमिव सुन्दरं मुखम्' इत्यत्र कमलनिरूपितसादृश्यवन्मुखं सौन्दर्यवदभिन्नम् इति बोधः । सादृश्यप्रयोजकं सौन्दर्य-

मिति तु अर्थाद्गम्यते। 'कमलवत् सुन्दरं मुखम्' इत्यत्र तु भवतीत्यध्याहारः। 'तेन तुल्यं क्रिया चेद्वतिः' (पा. सू. ५-१-११५) इति सूत्रेण क्रियातौल्ये एव वतिविधानात्। कमलपदस्य तत्कर्तृकभवने लक्षणा। कमलकर्तृकभवनसदृशम् इति कमलवत् पदार्थः। तदभिन्नं सुन्दरमुखकर्तृकं भवनम् इति बोधः। ततश्च कमलमुखयोः सौन्दर्यकृतं सादृश्यं मानसबोधविषयः।

अत्र पक्षे 'चन्द्रमिव मुखं पश्यामि' इत्यादौ चन्द्रादेः द्वितीया न स्यात्। चन्द्रपदार्थस्य इवार्थसादृश्येऽन्वयेन दर्शनक्रियाकर्मत्वाभावात्। तस्मात् चन्द्रादेः तत्सदृशे लक्षणा। इवशब्दस्तात्पर्यग्राहकः। चन्द्रसदृशाभिन्नं मुखं पश्यामीत्यर्थः। स्वाभिन्नमुखद्वारा फलाश्रयत्वात् चन्द्रपदार्थस्य कर्मता। 'चैत्रस्येव मैत्रस्य गृहम्' इत्यत्र गृहमित्यावृत्त्या चैत्रस्य गृहमिव मैत्रस्य गृहमिति योजना। चैत्रसम्बन्धिगृहसदृशाभिन्नं मैत्रसम्बन्धि गृहमिति शाब्दबोधः। औन्नत्यवैशाल्यादिसाधारणो धर्मस्तु गम्यः। 'शरैरुस्रैरिवोदीच्यान् उद्धरिष्यन् रसानिव' इत्यत्र उस्रसदृशैः शरैः रससदृशान् उदीच्यान् उद्धरिष्यन् इत्याद्यर्थः। शराणां रसानाञ्च तत्तत्सदृशेषु लक्षणास्वीकारादेव करणत्वं कर्मत्वञ्च बोध्यम्। इवशब्दस्तु द्योतकः। अन्यथा तदुत्तरतृतीयाया द्वितीयायाश्च अनन्वयप्रसङ्गः। 'गज इव शूरो गच्छति' इत्यत्र गजशब्दस्य गजकर्तृकगमनसदृशे लक्षणा। तदभिन्नं शूरकर्तृकं गमनमिति बोधः।

तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यमित्यपरे। भूयोधर्माश्च आह्लादकत्वादयः साधारणधर्माः। तद्गतत्वञ्च तत्सम्बन्ध एव। 'कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेन' इति हरिवचनात्। एवञ्च साधारणधर्मसम्बन्धः सादृश्यमिति फलति। तन्मते 'अरविन्दमिव सुन्दरं मुखम्' इत्यत्र अरविन्दपदार्थः आधेयतासम्बन्धेन इवपदार्थे साधारणधर्मेऽन्वेति। साधारणधर्मस्य अभेदेन सम्बन्धेन सुन्दरपदार्थैकदेशे

सुन्दरत्वेऽन्वयः । ततश्च अरविन्दवृत्तिसमानधर्माभिन्नसुन्दरत्ववदभिन्नं वदनमिति बोधः । यत्र तु सुन्दरत्वादिकं नोपात्तं 'अरविन्दमिव मुखम्' इत्यादौ तत्र साधारणधर्मस्य आश्रयतया उपमेयेऽन्वयः । अरविन्दवृत्ति-साधारणधर्माश्रयो मुखमिति बोधः । अस्मिन्नपि पक्षे 'अरविन्दमिव मुखं पश्यामि' इत्यत्र पूर्वोक्तदोषः स्थितः ।

नागेशभट्टास्तु— "सादृश्यमतिरिक्तः पदार्थः । साधारणधर्मस्तु सादृश्यप्रयोजकः । इवशब्दस्तु स्वसमभिव्याहृतचन्द्रादावुपमानत्वं तन्नि-र्वाहकमाह्लादकत्वादिसाधारणधर्मसम्बन्धञ्च द्योतयति । उपमानत्वञ्च साधारणधर्मवत्त्वेन ईषदितरपरिच्छेदकत्वम् । परिच्छेदकत्वादेव तस्य विशेषणता । परिच्छेदकत्वञ्च परिच्छेद्यप्रतीतिं विना अनुपपन्नम् इति मुखादावुपमेयत्वञ्च द्योतयति इवशब्दः । साधारणधर्मश्च क्वचित् शब्देनो-पात्तः, क्वचिदाक्षिप्तः । उपमानोपमेययोः यद्यपि स्वस्वरूपेण भेदः, तथापि आह्लादकत्वादिसाधारणधर्मवत्त्वेन अभेदः । अत एव उपमानतावच्छेदक-धर्ममुपमेये आरोप्य तयोरभेदेन अन्वयः । एवञ्च 'चन्द्र इव मुखमाह्लाद-कम' इत्यत्र चन्द्रे आह्लादकत्वमुपमानत्वञ्च, मुखे उपमेयत्वञ्च इवशब्दो द्योतयति । तथा च आह्लादकोपमानभूतचन्द्राभिन्नमाह्लादकमुपमेयं मुखमिति शाब्दबोधः । साधारणधर्मसम्बन्धश्च क्वचिद्विशेषणतया । यथा 'चन्द्र इव मुखमाह्लादकम्' इत्यत्र । क्वचिद्विशेष्यतया । यथा 'चन्द्र इव मुखमाह्लादयति' इत्यत्र । अत्र हि साधारणधर्मः विशेष्यतया तिङन्तेन उपात्त इति 'उपमानचन्द्रकर्तृकाह्लादाभिन्नः उपमेयमुखकर्तृकाह्लादः' इति बोधः । उपमानोपमेययोरभेदान्वयादेव 'चन्द्रमिव मुखं पश्यामि' इत्यादौ तयोरेकविभक्तित्वनियमः । 'गज इव गच्छति चैत्रः' इत्यत्र गजशब्दस्य उपमानभूतगजकर्तृकगमनम् इत्यर्थः । उपमानभूतगजकर्तृकगमनाभिन्न-मुपमेयदेवदत्तकर्तृकं गमनम्—इति बोधः" इत्याहुः ।

सम्भावनापि इवशब्दद्योत्या। उत्कटैकतरकोटिकः संशयः सम्भावना। भूयोधर्मवत्त्वं सम्भावनायां प्रयोजकम्। इवार्थे सादृश्ये तद्गतभूयोधर्मवत्त्वं तद्भिन्ने प्रतीयते। सम्भावनायान्तु तद्गतभूयोधर्मवत्त्वेन निमित्तेन तद्भिन्ने तत्तादात्म्यमुत्कटकोटिकत्वेन प्रतीयत इति विशेषः। 'दूरे तिष्ठन् देवदत्तः यज्ञदत्त इव दृश्यते' इत्यत्र इवशब्दार्थः सम्भावना। यज्ञदत्तस्य प्रकारतानिरूपकत्वसम्बन्धेन सम्भावनायामन्वयः। तस्याश्च विषयतासम्बन्धेन देवदत्तेऽन्वयः। तादात्म्यञ्च प्रकारतायां संसर्गः। एवञ्च तादात्म्यसंसर्गेण यज्ञदत्तनिष्ठप्रकारतानिरूपकसम्भावनाविषयदेवदत्तनिष्ठा चाक्षुषज्ञानविषयता—इति 'देवदत्तो यज्ञदत्त इव दृश्यते' इति वाक्याज्जायमानः शाब्दबोधः। तिङन्तेन योगे सर्वत्र इवार्थः सम्भावना। 'न वै तिङन्तेनोपमानमस्ति' इति सन्सूत्रस्थभाष्यात्। 'चैत्रो गच्छतीव' इत्यत्र चैत्रकर्तृकगमनं सम्भावनाविषयभूतम्—इति बोधः। चैत्रकर्तृकयत्किञ्चिद्व्यापारेण निमित्तेन गमनं सम्भावनाविषयीकृतम्। इयञ्च सम्भावना आहार्या, अनाहार्येति द्विविधा। अनाहार्या पूर्वोक्तस्थले। तस्या आहार्यत्वे तु 'धूमस्तोमं तमः शङ्के' इत्यादौ उत्प्रेक्षालङ्कार इत्यालङ्कारिकाणां व्यवहारः।

४. अथ सहशब्दार्थः।

'पुत्रेण सहागच्छति पिता' इत्यादौ साहित्यं सहशब्दार्थः। तच्च स्वसमभिव्याहृतशब्दजन्योपस्थितिविषयक्रियादिसमानकालिकतत्क्रियादिमत्त्वम्। तृतीयार्थस्तु सहार्थानुयोगिनः मित्रादेः क्रियादौ यादृशः सम्बन्धः सः। स च क्रियावाचकशब्दसत्त्वे कर्तृत्वादिः, द्रव्यगुणयोर्योगे स्वत्वादिः। प्रकृते आगमनसमानकालिकागमनं सहशब्दार्थः। पुत्रशब्दोत्तरतृतीयार्थः कर्तृत्वम्। तस्य निरूपकत्वसम्बन्धेन सहार्थैकदेशे प्रथमागमने (पुत्रागमने) अन्वयः। द्वितीयागमनस्य (पितुरागमनस्य) कर्तृत्वसम्बन्धेन आश्रयतासम्बन्धेन वा पितर्यन्वयः। तस्य अभेदसम्बन्धेन

तिङर्थे कर्तरि । तस्याधेयतासम्बन्धेन धात्वर्थगमनेऽन्वयः । वर्तमाने लट् । 'पुत्रकर्तृकागमनसमानकालिकागमनाश्रयपित्रभिन्नकर्तृनिष्ठं वर्तमानकालिकमागमनम्'—इति बोधः । अस्मिन् बोधे पितर्यागमनक्रियाया द्वेधा भानं द्रष्टव्यम् । उद्देश्यतावच्छेदकविधेययोरैक्यं तु तयोरीषद्भेदमादाय व्युत्पत्तिवादे परिहृतम् । विस्तरस्तु तत्रैव द्रष्टव्यः । वैयाकरणनये तु साहित्यमखण्डोपाधिरूपम् । तच्च समानदेशकालस्वत्वादिसम्बन्धैः एकक्रियाद्रव्याद्यन्वयित्वसमनियतम् । 'पुत्रेण सह आगच्छति पिता' इत्यत्र पुत्रसाहित्यवान् पिता आगच्छति इत्येव बोधः । पुत्रे समानकालिकागमनं तु सहशब्दान्वयबलात् पश्चात् प्रतीयते । आगमनक्रियान्वयः पितरि शाब्दः, पुत्रे तु आर्थः । अत एव 'सहयुक्तेऽप्रधाने [पा.सू. २-३-१९] इति सूत्रेण पुत्रशब्दात् तृतीया । पुत्रे अप्रधानत्वं हि शाब्दगुणाद्यन्वयित्वाभावरूपम् । न तु लौकिकमप्रधानत्वम् । 'राज्ञा सह सेना आगच्छति' इत्यत्र राजशब्दात् तृतीयानापत्तेः । एवञ्च तृतीयान्तार्थे क्रियादिप्रतीतिर्मानसी इत्येव सूत्रस्वरसः ।

पुत्रेण सह पिता स्थूलः ।

अत्र पुत्रसाहित्यवान् पिता स्थूलः इति,

पुत्रेण सह पितुर्धनम् ।

इत्यत्र पुत्रसाहित्यवतः पितुर्धनमिति च बोधः । पुत्रे समानकालिकस्थौल्यस्य, धने पुत्रवृत्तिस्वामितानिरूपितस्वत्वस्य च बोधो मानसः । यदि तु पुत्रेऽपि क्रियादिसम्बन्धः शाब्दबोधे भासते, न त्वसौ मानसबोधविषय इत्यनुभवः, तर्हि समभिव्याहृतपदबोध्यक्रियादिसमानकालिकत्वं सहशब्दार्थः । 'पुत्रेण सह आगच्छति पिता' इत्यत्र आगमनसमानकालिकत्वं साहित्यम् । पुत्रस्य कर्तृत्वसम्बन्धेन आगमने समानकालिकत्वस्य आश्रयतासम्बन्धेन धात्वर्थे आगमनेऽन्वयः । 'पुत्रकर्तृकागमनसमानकालिकं पितृकर्तृकागमनम्'—इति बोधः । 'पुत्रेण सह स्थूलः'

इत्यत्र स्थौल्यसमानकालिकत्वं सहशब्दार्थः । तस्य स्थूलपदार्थैकदेशे स्थौल्येऽन्वयः । 'पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवान् पिता' इति बोधः । 'पुत्रेण सह पितुर्धनम्' इत्यत्र स्वामितानिरूपितस्वत्वसमान-कालिकत्वं सहशब्दार्थः । तस्य षष्ठ्यर्थसम्बन्धेऽन्वयः । पुत्रवृत्ति-स्वामितानिरूपितस्वत्वसमकालिकं यत् पितृनिष्ठस्वामितानिरूपितं स्वत्वं तद्वत् धनमिति बोधः । अत्र पक्षे पुत्रस्य पितर्यन्वयः परम्परया । 'सपुत्रः पिता आगतः' इति समासस्तु 'तेन सहेति तुल्ययोगे' (पा.सू. २-२-२८) इति सूत्रबलात् समर्थनीयः । अत्र साहित्यमखण्डोपाधिरिति पक्ष एव ज्यायानिति प्रतिभाति । पूर्वोक्तशाब्दबोधप्रकारस्तु समानवित्तिवेद्यत्वेन उपपादनीयः । अत्र विद्वांसः प्रमाणम् । यत्र माषवापोत्तरं तिलवापः तत्र 'माषैः सह तिलान् वपति' इति प्रयोगे समानदेशत्वमात्रप्रतीतिः, न तु समानकालिकत्वस्य । 'सहैव दशभिः पुत्रैः भारं वहति गर्दभी' इत्यत्र यदि 'दशानां पुत्राणां विद्यमानत्वेऽपि' इत्यर्थो बुबोधयिषितः, तर्हि सत्तासमकालिकत्वं सहार्थ इत्यभ्युपेयम् । दशपुत्रसत्तासमानकालिकं गर्दभीकर्तृकं भारकर्मकं वहनम्—इति बोधः ।

५. अथ चशब्दार्थः ।

'चार्थे द्वन्द्वः' (पा.सू. २-२-२९) इति सूत्रे सिद्धान्तकौमुद्यामेवमुक्तम् । 'समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । परस्परनिरपेक्षस्यानेकस्य एकस्मिन् अन्वयः समुच्चयः । अन्यतरस्यानुषङ्गिकत्वे अन्वाचयः । मिलितानामन्वयः इतरेतरयोगः । समूहः समाहारः' इति । 'एकस्मिन् अन्वयः समुच्चयः' इत्यत्र 'अन्वयः' इति प्रतीकमादाय 'यत्रैवमन्वयः तत्र समुच्चयः चशब्दार्थः । न त्वन्वय एव समुच्चय इति भ्रमितव्यम्' । इति नागेशभट्टाः व्याचख्युः । तत्र 'समुच्चयान्वाचययोः चशब्दो द्योतकः, तदर्थस्य साहित्यस्य विशेषणतया समभिव्याहृतपदार्थे प्रतीतेः । इतरेतरयोगसमाहारयोस्तु चशब्दो वाचकः । तदर्थसाहित्यस्य तत्र

विशेष्यतया प्रतीतेः' इत्यपि तैरेव भाष्यप्रदीपोद्योते प्रतिपादितम् । एवञ्च चशब्दार्थः साहित्यम् । साहित्यञ्च बहुविधम् । समुच्चयादयः साहित्यभेदाः इति विज्ञायते । सहशब्दार्थसाहित्यं नियमेन समानकालिकत्वादिघटितम् । समुच्चयादयस्तु न तथेति भेदः ।

ईश्वरं गुरुञ्च भजस्व ।

अत्र चशब्दार्थः समुच्चयः । स च स्वसमभिव्याहृतगुरुपदार्थविशेषणतया ईश्वरपदार्थविशेष्यतया च बुध्यते । ईश्वरप्रतियोगिकसमुच्चयाश्रयं गुरुमित्यर्थः । अथवा गुरुपदस्य ईश्वरसमुच्चितगुरौ लक्षणा । चशब्दस्तु तात्पर्यग्राहक इति यावत् । अत्र एकस्य क्रियान्वयोत्तरं अपरस्य क्रियावाचकपदावृत्त्या अन्वय इति लघुशब्देन्दुशेखरे नागेशभट्टैरुक्तम् । तथा च 'ईश्वरं भजस्व' 'ईश्वरसमुच्चितं गुरुं भजस्व' इति वाक्यद्वयं निष्पद्यते । 'ईश्वरं गुरुञ्च भजस्व' इत्यत्र तु एकवाक्यता प्रतीयते । एकार्थविशेष्यकशाब्दबोधजनकत्वं कथमुक्तवाक्यद्वयस्य ? मम तु एवं प्रतिभाति । ईश्वरभजनविशिष्टं गुरुभजनमिति बोधः । वैशिष्ट्यञ्च स्वबोधोत्तरकालिकबोधविषयत्वेन, समुच्चितत्वेन वा । गुरोरिव गुरुभजनस्यापि समुच्चितत्वे न किञ्चित् बाधकम् । 'ईश्वरभजनं कुरु गुरुभजनञ्च' इत्युक्तौ भजनसमुच्चयस्य प्रतीतेः । तथा च उक्तस्थले त्वमित्यध्याहारः । भजेः प्रीत्यनुकूलव्यापारोऽर्थः । लोडर्थः प्रेरणा । तस्या विषयतासम्बन्धेन धात्वर्थव्यापारेऽन्वयः । ईश्वरनिष्ठप्रीत्यनुकूलः त्वदभिन्नकर्तृनिष्ठो यो व्यापारः प्रेरणाविषयः तद्विशिष्टः ईश्वरसमुच्चितगुरुनिष्ठप्रीत्यनुकूलस्त्वत्कर्तृकः व्यापारः प्रेरणाविषयः—इति शाब्दबोधः । अत्र सुधियः प्रमाणम् ।

देवदत्तः पचति हसति च ।

अत्र क्रियासमुच्चयः । देवदत्तकर्तृकपचनव्यापारसमुच्चितः देवदत्तकर्तृकहसनव्यापारः—इति बोधः ।

भिक्षामट गाञ्चानय।

अत्र चशब्दार्थोऽन्वाचयः। आनुषङ्गिकत्वं व्याप्यत्वञ्च चशब्द-द्योत्यम्। आनुषङ्गिकत्वमनुद्देश्यरूपमप्राधान्यम्। उभयमपि चशब्द-समभिव्याहृत-नी-धात्वर्थानयनक्रियायाम्। आनयनक्रियागतव्याप्य-त्वञ्च चशब्दार्थप्रतियोग्यटनक्रियानिरूपितम्। तथा च 'भिक्षामट, गाञ्चानय'इत्यतः प्रेरणाविषयीभूतत्वत्कर्तृकभिक्षाटनव्याप्यमानुषङ्गिकं प्रेरणाविषयीभूतं त्वत्कर्तृकगवानयनम्—इति बोधः।

उद्भूतावयवभेदः समूहः इतरेतरयोगः। उद्भूतः=प्रकटः अवयवानां भेदः यस्य सः उद्भूतावयवभेदः। उद्भूतावयवभेदत्वस्य समूहे अवयवगतसङ्ख्यारोपवत्त्वम्। चशब्दार्थः साहित्यरूपः समूहो विशेष्यः। अत्र समूहे प्रत्येकावयववृत्तिर्धर्मः प्रवृत्तिनिमित्तम्। समुदायद्वारा अवयवा-नामपि प्रत्येकं कर्तृत्वादियोग इति तन्निमित्तिका विभक्तिः अवयवेभ्यः भवत्येव। अवयवानां समुदायानतिरेकात्। अवयवाभेदेन इतरेतरयोगे समूहः प्रतीयते। 'चैत्रो मैत्रो यज्ञदत्तश्च गच्छन्ति' इत्यत्र उद्भूतावयव-भेदः समूहः चार्थः। स च विशेष्यः। चैत्रमैत्रयज्ञदत्तरूपसमुदाया-भिन्नकर्तृनिष्ठो गमनव्यापार इति बोधः।

संज्ञापरिभाषमित्यादिसमाहारद्वन्द्वे तु अनुद्भूतावयवभेदः समूहोऽर्थः इत्येकवचनमेव। अवयवातिरिक्तत्वेन समूहस्य तत्र भानम्। समूहत्वं तत्र प्रवृत्तिनिमित्तम्, न तु प्रत्येकवृत्तिधर्म इति विशेषः॥

प्रति, परि, अभि—इत्यादयः केचन शब्दाः अर्थविशेषे कर्मप्रवचनीय-संज्ञां लभन्ते। तस्याः निपातसंज्ञया अव्ययसंज्ञया च समावेशः। कर्म= क्रियामुक्तवन्तः 'कर्मप्रवचनीयाः'। बाहुलकात् कर्तरि भूते अनीयर्। क्रियानिरूपितं सम्बन्धविशेषमेते द्योतयन्ति। 'कर्मप्रवचनीययुक्ते द्वितीया' (पा. सू. २-३-८) इति सूत्रेण एतद्योगे द्वितीया भवति।

वृक्षं प्रति विद्योतते विद्युत् ।

अत्र 'लक्षणेत्थंभूताख्यान ....' (पा. सू. १-४-९०) इत्यादिसूत्रेण प्रतिः कर्मप्रवचनीयः । लक्षणं ज्ञापकम् । वृक्षप्रकाशज्ञानेन विद्युद्विद्योतनं ज्ञायत इति वृक्षो ज्ञापकः । तस्य ज्ञापकत्वं स्वज्ञानद्वारा । ज्ञापकता-निरूपितज्ञाप्यत्वं द्वितीयार्थः । वृक्षस्य वृत्तित्वसम्बन्धेन ज्ञापकताया-मन्वयः । ज्ञाप्यत्वस्य आश्रयतासम्बन्धेन धात्वर्थविद्योतनेऽन्वयः । वृक्षनिष्ठज्ञापकतानिरूपितज्ञाप्यताश्रयः विद्युत्कर्तृकविद्योतनव्यापारः— इति बोधः ।

अश्वो मां प्रति ।

भागेऽर्थे प्रतिः कर्मप्रवचनीयः । भागो नाम स्वत्वाश्रयः । स्वस्वामिसम्बन्धोऽत्र प्रतिद्योत्यो द्वितीयार्थः । मन्निष्ठस्वामितानिरूपित-स्वत्वाश्रयोऽश्वः इति बोधः ।

वृक्षं वृक्षं प्रति-परि-अनु वा सिञ्चति ।

अत्र वीप्सायां प्रत्यादयः कर्मप्रवचनीयाः । अत्र 'नित्यवीप्सयोः' (पा. सू. ८-१-४) इति द्विर्वचनेन बुद्धिस्थयावत्प्रकृत्यर्थनिष्ठव्याप्यत्वं द्योत्यते । व्याप्यत्वविशिष्टवृक्षादीनां व्यापकत्वसम्बन्धेन क्रियान्वयः प्रत्यादिद्योत्यः । व्यापकत्वं द्वितीयार्थः । व्याप्यवृक्षनिरूपितव्यापकत्ववत् सेचनमिति बोधः । यद्यप्यत्र द्विर्वचनेनैव वृक्षादौ क्रियाव्याप्तिः बुध्यते, तथापि 'परिसिञ्चति' इत्यत्र षत्वबाधनार्था, सम्बन्धसामान्यविवक्षायां षष्ठीबाधनार्था च कर्मप्रवचनीयसंज्ञा । सेचने व्यापकत्वञ्च स्वाधिकरण-वृत्त्यत्यन्ताभावाप्रतियोगित्वम् । स्वं वृक्षत्वम् ।

वातं विना वृक्षः पतितः ।

विनाशब्दार्थोऽभावः । तस्याश्रयतासम्बन्धेन वृक्षेऽन्वयः । द्वितीयार्थः प्रतियोगित्वम् । वातप्रतियोगिकाभावाश्रयो वृक्षः पतनाश्रयः

*

इति शाब्दबोधः । पतने वातजन्यत्वाभावलाभस्तु आर्थः इति केचित् । अन्ये तु जनकतानिरूपितजन्यत्वप्रतियोगित्वं द्वितीयार्थः । प्रकृत्यर्थस्य सम्बन्धैकदेशे जनकतायामन्वयः । विनाशब्दार्थस्याभावस्य पतधात्वर्थे पतनेऽन्वयः । वातनिष्ठजनकतानिरूपितजन्यत्वप्रतियोगित्वाभाववत्-पतनाश्रयो वृक्ष इति बोधः इत्याहुः । अपरे तु विनापदार्थस्य अभावस्य समानकालिकत्वसम्बन्धेन पतनेऽन्वयं वदन्ति । तन्मते वातप्रतियोगिका-भावसमानकालिकपतनाश्रयो वृक्ष इति बोधः ।

पुत्रं विना आगतः पिता ।

अत्र पुत्रशब्दस्य पुत्रकर्तृकागमने लक्षणा । विनाशब्दार्थाभावस्य समानकालिकत्वसम्बन्धेन धात्वर्थागमनेऽन्वयः । पुत्रकर्तृकागमना-भावसमानकालिकागमनाश्रयः पितेति शाब्दधीः ।

विना क्षीरं बालो रोदिति ।

अत्राभावस्य प्रयोज्यतासम्बन्धेन रोदनेऽन्वयः । क्षीराभावप्रयोज्यताश्रयो बालकर्तृकं रोदनमिति बोधः ।

हरिं विना न सुखम् ।

हरिशब्दः हरिभक्तौ लाक्षणिकः । हरिभक्त्यभावप्रयोज्यः सुखाभाव इति बोधः । विनाशब्दार्थोऽभावः स्वविशेष्यतया पदार्थान्तरसाकाङ्क्ष एव प्रतीयते । अत एव चैत्रो न गच्छति इत्यर्थे 'चैत्रस्य गमनं विना' इति न प्रयोगः । एवम् अन्तरा, ऋते इत्यादिशब्दयोगेऽपि ।

अमुं नारद इत्यबोधि सः ।

अत्र तच्छब्देन श्रीकृष्णस्य परामर्शः । अदःशब्देन श्रीकृष्णदृष्टाकृति-विशेषस्य च । इतिशब्दार्थः प्रकारता । तत्र नारदपदार्थस्य आधेयता-सम्बन्धेन अन्वयः । प्रथमा तु साधुत्वार्था । प्रकारतायां तादात्म्यं संसर्गतया भासते । अमुम् इत्यत्र द्वितीयार्थः विशेष्यताख्या विषयता ।

प्रकारतायाः विशेष्यतायाश्च निरूपकत्वसम्बन्धेन बुधधात्वर्थे ज्ञानेऽन्वयः। तथा च तादात्म्यसंसर्गेण नारदनिष्ठप्रकारतानिरूपकं अदःपदार्थनिष्ठ-विशेष्यतानिरूपकञ्च श्रीकृष्णनिष्ठं भौतकालिकं ज्ञानमिति शाब्दबोधः।

तादात्म्यसम्बन्धावच्छिन्नप्रकारतायाः कर्मत्वानुशिष्टद्वितीयार्थकत्वं 'रङ्गं रजतं जानाति' इत्यत्र व्युत्पत्तिवादे भट्टाचार्यैः स्वीकृतम्। अत एव इतिशब्देन कर्मत्वस्याभिधानात् नारदपदोत्तरं न द्वितीया। केचित्तु इतिशब्दस्यैव नारद इत्यर्थः। नारदपदं तु तात्पर्यग्राहकम्। इतिशब्दस्य अव्ययत्वात् तदुत्तरद्वितीया लुप्ता। अमुं नारदाभिन्नमबोधीत्यर्थमाहुः। नागेशभट्टैस्तु 'नारद इति' इति श्रीकृष्णीयज्ञानाकारानुकरणम् इत्युक्तम्। तन्मते तु आकृतिविशेषनिष्ठविषयतानिरूपकं नारद इत्येतच्छब्दाभिलप्य-मानाकारकं श्रीकृष्णनिष्ठं भौतकालिकं ज्ञानमिति बोधः।

चैत्र इति वदति।

चैत्रपदस्य 'चैत्रः' इति शब्दोऽर्थः। इतिशब्दः तस्य शब्दपरत्वे तात्पर्यग्राहकः। वदधातोः अभिव्यक्त्यनुकूलमुच्चारणमर्थः। उच्चारणस्य कण्ठताल्वाद्यभिहननरूपो व्यापारः। अभिव्यक्तिश्च विषयतासम्बन्धेन चैत्रशब्दनिष्ठा। चैत्रशब्दनिष्ठाभिव्यक्त्यनुकूलमुच्चारणमिति बोधः।

चैत्र इति नाम।

पूर्ववदेव चैत्रशब्दस्य 'चैत्र' इति शब्दोऽर्थः। अभेदः सम्बन्धः। चैत्राभिन्नं नामेति बोधः।

(रावणः क्रूरः) विभीषणस्तु साधुः।

तुशब्दार्थो वैलक्षण्यम्। तच्च पूर्वोक्तरावणप्रतियोगिकं बुध्यते। तस्याश्रयतासम्बन्धेन विभीषणपदार्थेऽन्वयः। रावणप्रतियोगिक-वैलक्षण्याश्रयो विभीषणः साधुरिति बोधः। अथवा वैलक्षण्यस्य प्रयोजकता-सम्बन्धेन साधुपदार्थैकदेशे साधुत्वेऽन्वयः। रावणप्रतियोगिकवैलक्षण्य-प्रयोजकसाधुत्ववान् विभीषण इति बोधः।

यदि रामो वनं गच्छति तर्हि सीतापि गच्छति ।

यदिशब्दार्थः प्रयोजकता । 'रामो वनं गच्छति' इत्यत्र विद्यमान-गच्छत्यर्थगमनस्य वृत्तित्वसम्बन्धेन प्रयोजकतायामन्वयः । तर्हिशब्दस्य प्रयोज्यत्वमर्थः । प्रयोजकतायाः निरूपितत्वसम्बन्धेन प्रयोज्यत्वेऽन्वयः । प्रयोज्यत्वस्य द्वितीयशब्दगच्छत्यर्थे गमने आश्रयतासम्बन्धेनान्वयः । अपिशब्दार्थः समुच्चयः । तस्याश्रयतासम्बन्धेन सीतायामन्वयः । सीता गच्छतीत्यत्र वनमित्यध्याहार्यम् । रामकर्तृकवनगमननिष्ठप्रयोजकतानिरूपित-प्रयोज्यताश्रयः समुच्चयाश्रयसीताकर्तृकवनकर्मकगमनम् इति बोधः ।

अयं सर्पो रज्जुर्वेति सन्देग्धि ।

एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं संशय इत्युक्तम् । 'अयम्' इत्यनेन पुरोवर्ती कश्चित् पदार्थो धर्मी बोध्यते । तस्मिन् सर्पो रज्जुश्चेति परस्परविरुद्धौ तादात्म्यसम्बन्धेन भासेते । समानविभक्तिक-नामार्थयोः तादात्म्यं संसर्गः । सर्पो वा रज्जुर्वेति च कोटिद्वयम् । सर्पो वा इत्यत्र वाशब्दार्थो विरोधः । स च रज्जुप्रतियोगिको बुध्यते समभिव्याहारबलात् । विरोधस्य आश्रयतासम्बन्धेन सर्पेऽन्वयः । इति-शब्दार्थः प्रकारता । सर्पपदार्थस्य प्रकारतायाम् आधेयतासम्बन्धेनान्वयः । तथा च रज्जुप्रतियोगिकविरोधाश्रयसर्पनिष्ठा प्रकारतेति प्रथमकोटेरर्थः । एवमेव रज्जुर्वेति द्वितीयकोटेरप्यन्वयो बोध्यः । प्रकारताद्वयस्यापि निरूप-कतासम्बन्धेन धात्वर्थे सन्देहेऽन्वयः । इदंपदार्थस्य विशेष्यता-निरूपकत्वसम्बन्धेन धात्वर्थसन्देहे अन्वयः । एवञ्च, तादात्म्यसम्बन्धेन रज्जुप्रतियोगिकविरोधाश्रयसर्पनिष्ठा या प्रकारता, तादात्म्यसम्बन्धेन सर्पप्रतियोगिकविरोधाश्रयरज्जुनिष्ठा च या प्रकारता तदुभयप्रकारता-निरूपकः इदंपदार्थविशेष्यतानिरूपकश्च सन्देहरूपव्यापारः कर्तृनिष्ठः इति शाब्दबोधः ।

आ मुक्तेः संसारः ।

'आङ् मर्यादावचने' (पा. सू. १-४-८९) इति सूत्रेण मर्यादायामाङ् कर्मप्रवचनीयः । 'पञ्चम्यपाङ्परिभिः' (पा. सू. २-३-१०) इति सूत्रेण मुक्तिशब्दात् पञ्चमी । तं विना मर्यादा । तेन सह अभिविधिरिति वृद्धोक्तिः । अत्र कालरूपा मर्यादा प्रतीयते । कालगतमर्यादात्वञ्च स्वप्रागभावाधिकरणकालवृत्तिः यः समभिव्याहृतपदार्थः तदनधिकरणत्वम् । अत्र आङर्थो व्यापकत्वम् । पञ्चम्यर्थो निरूपितत्वम् । मुक्तिपदञ्च मुक्त्यधिकरणकालप्रागभावपरम् । निरूपितत्वस्य आश्रयतासम्बन्धेन आङर्थे व्यापकत्वेऽन्वयः । व्यापकत्वस्य च स्वप्रतियोग्यवृत्तित्व-विशिष्टाश्रयतासम्बन्धेन संसारेऽन्वयः । स्वं=मुक्त्यधिकरणकालप्रागभावः । एवञ्च, मुक्त्यधिकरणकालप्रागभावनिरूपितस्वप्रतियोग्यवृत्तित्वविशिष्ट-व्यापकतावान् संसार इति शाब्दबोधः ।

उभयतः कृष्णं गोप्यः ।

उभयशब्दस्य पार्श्वद्वयमर्थः । आद्यादित्वात् सप्तम्यास्तसिः । अधिकरणत्वं तसेरर्थः । तस्य स्वनिरूपिताधेयतासम्बन्धेन गोपीष्वन्वयः । कृष्णपदोत्तरद्वितीयायाः सम्बन्धसामान्यमर्थः । उपपदविभक्तीनां शेष-षष्ठ्यपवादत्वात् । कृष्णसम्बन्धिपार्श्वद्वयनिष्ठाधिकरणतानिरूपिताधेयता-वत्यो गोप्य इति शाब्दबोधः ।

अन्तरा नन्दं यशोदाञ्च हरिः ।

अन्तरेत्यव्ययं मध्यदेशार्थकमधिकरणशक्तिप्रधानम् । नन्दशब्दोत्तर-द्वितीयायाः यशोदाशब्दोत्तरद्वितीयायाश्च अवधित्वरूपसम्बन्धोऽर्थः । तस्य निरूपकत्वसम्बन्धेन अन्तराशब्दार्थैकदेशे मध्यत्वेऽन्वयः । अन्तराशब्दा-र्थैकदेशाधिकरणतायाः स्वनिरूपिताधेयतासम्बन्धेन हरावन्वयः । नन्द-निष्ठावधित्वनिरूपितयशोदानिष्ठावधित्वनिरूपितं यन्मध्यत्वं तद्वद्देश-निष्ठाधिकरणतानिरूपिताधेयतावान् हरिरिति बोधः ।

अन्तरा हरिं न सुखम् ।

अत्र तु अत्यन्ताभावोऽन्तराशब्दार्थः । हरिशब्दः हरिविषयकभक्तौ लाक्षणिकः । द्वितीयार्थः प्रतियोगित्वम् । तच्च अन्तराशब्दार्थेऽभावेऽन्वेति । अभावश्च प्रयोज्यतासम्बन्धेन नञर्थाभावेऽन्वेति । एवञ्च, हरिभक्ति-प्रतियोगिकाभावप्रयोज्यः सुखाभाव इति बोधः ।

हरये नमः ।

उत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारो नमःशब्दार्थः । स च व्यापारः क्वचित् करशिरःसंयोगादिरूपः, क्वचित् ईदृशशब्दप्रयोगरूपः । अयं व्यापारः प्रयोक्तृनिष्ठ एव प्रतीयते । अपकृष्टत्वमपि प्रयोक्तृनिष्ठमेव प्रतीयते, शब्दशक्तिस्वाभाव्यात् । चतुर्थ्यर्थः आश्रयत्वम् । अथवा अपकर्षकबोधानुकूलव्यापारो नमःपदार्थः । अपकर्षो व्यापारश्च प्रयोक्तृ-गतौ । अवधित्वं चतुर्थ्यर्थः । तस्य निरूपकतासम्बन्धेन अपकर्षेऽन्वयः । हरिनिष्ठावधित्वनिरूपकस्वापकर्षकबोधानुकूलः स्वव्यापारः इति बोधः । अत्र स्वः प्रयोक्ता । हरिनिष्ठोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारः प्रयोक्तृनिष्ठ इति बोधः ।

एषोऽर्घ्यः शिवाय नमः ।

नमःशब्दार्थोऽत्र त्यागः । त्यागश्च स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनम् । चतुर्थ्यर्थः उद्देश्यत्वम् । तच्च स्वत्वभागितया त्यागजनकेच्छाविषयत्वम् । नमःपदार्थत्यागस्य विषयताविशेषसम्बन्धेन अर्घ्येऽन्वयः । शिवोद्देश्यक-त्यागविषयोऽर्घ्य इति बोधः ।

प्रजाभ्यः स्वस्ति ।

स्वस्तिशब्दस्य मङ्गलमर्थः । सम्बन्धश्चतुर्थ्यर्थः । प्रजासम्बन्धि मङ्गलमिति बोधः ।

स्वस्त्यस्तु गोभ्यः ।

अत्र आशिषि लोट् । आशीश्च शुभाशंसनम् । तस्य विषयतासम्बन्धेन

असधात्वर्थे भवने अन्वयः। गोसम्बन्धिमङ्गलकर्तृकमाशीर्विषयभूतं भवनमिति बोधः।

स्वस्त्यस्तु सर्वजगताम्।

अत्र 'सर्वजगताम्' इत्यस्य 'अस्तु' इत्यनेन अन्वयः। न तु स्वस्तिशब्देन। अत एव चतुर्थी न। सम्बन्धसामान्ये षष्ठी। स्वस्तिकर्तृकं सर्वजगत्सम्बन्धि आशीर्विषयभूतं भवनमिति बोध इति शम्॥

सारस्वताराधनम्

ॐकारमन्दिरमनोहररत्नदीपा-
मज्ञानगाढतिमिरापहचित्प्रकाशाम् ।
सृष्टिस्थितिप्रलयकौतुककेलिशीलां
विद्यामनादिनिधनां हृदि भावयामि ॥

अथ, अहैतुककृपाजलधेर्निखिलकल्याणनिधेर्भगवतो विविधावतारलीलाविलासभूमिः, वर्तमानभूतभविष्यद्वस्तुनिचयं करतलबदरवदवलोकयतां दीर्घतपसां कश्यपादीनां पूर्वेषां परमर्षीणां तपस्यागारः, अध्यात्मज्ञानिनां जनकादीनां राजर्षीणामाध्यात्मिकविचारमन्दिरम्, वेदशास्त्रादिचतुर्दशविद्यानामध्ययनक्षेत्रम्, गङ्गातुङ्गादिनैकपुण्योदवाहिनीनां सलिलावगाहेन संक्षालनीयनिखिलमानसिककषायाणां निर्णेजनगृहम्, सनातनधर्मप्रसारकाणां शङ्कराद्याचार्याणां धर्मपीठसंस्थापनधर्मानुष्ठानस्थानम्, संस्कृतप्राकृतापभ्रंशदेश्यादिनिखिलभाषाविदामनेकेषां कविपुङ्गवानाञ्चाश्रयः, अनेकासां कलानां विज्ञानादीनां च विविधविश्वविद्यालयानां सञ्चालनस्थानम्, सनातनतदितरधर्मानुयायिसर्वप्रजाजीवातुहेतुः, भारतीयानामस्माकं प्राक्तनानां च जन्मभूः, धरणीमण्डलमण्डनायमाना सेयं भारतवसुन्धरा प्राचीनान्यर्वाचीनान्युच्चावचानि चानर्घाणि विद्वद्रत्नानि रत्नाकरो वज्रवैडूर्यादिबहूनि रत्नानीवात्मनो गर्भे दधाना रत्नगर्भेत्यन्वर्थनामधेया सम्प्रत्यपि स्वीयेन महिम्ना रोचमाना वरीवर्तीति महद्गौरवस्थानमस्माकम् ।

अत्र भारते औत्तरेया इव दाक्षिणात्याः प्राचीना इवार्वाचीनाः पण्डिता गैर्वाण्यां वाण्यां देश्यायां भाषायां च काव्यशास्त्रपुराणेतिहासादिष्वाकरेषु स्वाभिलषितं विषयमधिकृत्य स्वमनीषया मीमांसितानि नूतनतया विमृष्टानि विपुलानि ग्रन्थजातानि प्रकाशयांचक्रिरे ।

त एते यथामति सारस्वताराधनेन वेदमुपबृंहयन्तः परिणतवयस्काः स्वजीवनं कृतार्थीकुर्वन्तो विराजन्ते ।

किञ्च त एते महाभागा विद्वांसः कवयश्च नवनवोन्मेषशालिन्या प्रज्ञया स्वानुभवसिद्धं सिद्धान्तं मण्डयन्तः प्रतिवादिभयङ्कराः विद्वत्-सभासु, स्वाध्यायाद्यध्यापनपटिष्ठाः विद्यार्थिलोकेषु, सरसकविताचतुराः काव्यगोष्ठीषु, लौकिकन्यायविचक्षणा लौकिकविद्यावत्सु च गौरवमादधाना विविधधर्माचार्यपीठेन भारतीयराजकीयप्रशासनेन च पुरस्कृता यशस्कामा शोभन्त इत्येतत् प्रमोदास्पदं समेषाम् ।

अस्ति हि कर्णाटकराज्ये प्रकृतिरमणीयः शिवमुखाभिधानः प्रान्त-विशेषः (Shimoga District) यत्र शरावतीसरित्सलिलशीकरनिर्झर-पातजर्जरशब्दायमानं केन्द्रीयभारतप्रशासनस्थापितं जोगाभिधानं विद्यु-दुत्पादकं क्षेत्रं प्रथितम् । तत्र हि प्रान्ते पुरा केलदिसांस्थानिकभूपाल-प्रशासितं, कमनीयकाननपरिवृतं, गन्धतरुसुरभिगन्धवहगन्धवाहाधि-वासितं, गन्धसारद्रुमतक्षणकुशलकरकलाकोविदैरध्युषितं, भगवतः श्रीरङ्गनाथस्वामिनः करुणावारिसेकसुभगं, दण्डावतीतीरस्थितं सुरभिनामकं पुरं (Soraba) विद्यते खलु । तत्सुरभिपुरं निकषा सस्यश्यामलशालेयवना-वनीविलसिते पूगवाटीशतपरीवृते प्रदेशे सदाचारपूतैर्विद्वत्कुलीनैः तपः-कृतात्मसंस्कारैर्निर्मलमनोभिर्नानागोत्रीयैर्गृहमेधिभिः हव्यकैर्द्विजैरधिष्ठिता नडेहल्लीनाम्नी काचन पल्ली विजयतेतराम् । या खल्वभिनन्दनीयचरितस्य धवलयशसो महाविदुषः सुगृहीतनाम्नः श्रीमतो रङ्गनाथशर्मणः पितृ-पितामहप्रभृतिभिर्मेधाविभिरभिजनैरध्युषिता जन्मभूमिः ।

तत्र खलु गोत्रेण वैश्वामित्रः सूत्रेण बौधायनः स्वाध्यायेन यजुषा तैत्तिरीयः सदाचारेण पूतो वंशेन शुद्धो जन्मना ब्राह्मणः प्रकृत्या धीरोऽध्यात्मानुरागो देवद्विजगुरुसमाराधनपर आर्यगृह्यो भगवतो रङ्गनाथ-

स्वामिनश्चरणारविन्दसेवापर्युत्सुकान्तरङ्गः पातिव्रत्येन सीतासावित्रीसध्रीचया जानकीतिनामधेयया जायया गृहमेधी कोऽप्यातिथेयस्सभ्यस्तिम्मप्पनामा गृहस्थो निवसति स्म ।

तयोर्जानकीतिम्मप्पाख्ययोर्दम्पत्योः १८३६ तमे शालिवाहनशके राक्षससंवत्सरे वैशाखमासि शुक्लपक्षे पञ्चम्यां तिथौ बुधवासरे सुमुहूर्ते पुत्रोत्सवो महानासीत् । ततः पिता स्वापत्यं यथाकालं जातकर्मणा संस्कृत्य, सुरभिपुराधिदैवतस्य भगवतो नाम्ना "रङ्गनाथ" इत्याजुहाव । ततो जनन्या वात्सल्यातिशयेन परिपोष्यमाणः शिशू रङ्गनाथः सितपक्षीयः शशीव प्रतिदिनं वर्धमानः परिपुष्टाङ्गयष्टिर्बालसहजेन सौकुमार्येण, सौन्दर्येण च मातापित्रोर्बान्धवानां च मनो जहार । ततः पित्रा यथाकालं यथाशास्त्रमुपानीयत । सावित्रीग्रहणानन्तरं कृतसन्ध्योपासनः सोऽयं वटुः "अग्निर्वै माणवकः" इति श्रुत्यर्थस्य स्वात्मानमुदाहरणीकुर्वन्निव तेजसा हव्यवाहन इवासीत् ।

अनन्तरं स्वग्रामे कन्नडप्राथमिकशिक्षणमलभत सोऽयं वटुः । ततः पूर्वजन्मवासनावासितान्तःकरण इव कुमारो रङ्गनाथः स्वकुलोचितां वैदिकीं विद्यामध्येतुं श्रद्धालुरभवत् । ततो नडेहल्लीपल्लीतो नातिदूरवर्तिनि केलदिग्रामे स्थितायां वेदपाठशालायां प्रायष्षोडशवर्षदेशीयस्यास्य बालकस्य प्रवेशोऽभूत् । तत्र तत्रभवतां वैदिकश्रेष्ठानां ब्रह्मश्रीमच्चूरु केशवशास्त्रिणां, ब्रह्मीभूतहोसहल्लीब्रह्मश्रीनारायणशास्त्रिणां च सन्निधौ वेदे कालोचितमन्त्रभागान् , संस्कृते बालशिक्षणार्हाणि प्रथमपरीक्षापठ्यानि, काव्यपरीक्षापठ्यानि च बालोऽयं पपाठ । ततो मध्यमशालायां प्रौढशालायां च लौकिकविद्यामप्यपाठीत् ।

अथ गुडजिह्विकान्यायेन गैर्वाण्यां सकृदास्वादितकाव्यरसस्य रङ्गनाथस्यास्य चेतोवृत्तिर्माघनैषधादिप्रौढकाव्यानि, चम्पूनाटकादीनि च पठितुं त्वरते स्म । तदानीं सोऽयं बालः कल्याणनगरे (in Bangalore

City) महीशूरमहाराजप्रकल्पितं प्रौढसंस्कृतविद्याभ्याससौविध्यमस्तीति केनापि कथ्यमानमश्रौषीत् । अनन्तरमसौ कल्याणनगरमाजगाम । तत्रत्यायां श्रीमच्चामराजेन्द्रसंस्कृतमहापाठशालायां चम्पूनाटकादि पठित्वा प्रवेशपरीक्षामुत्ततार ।

ततस्तत्र शालायां वैदिकाचारनिष्ठेभ्यस्तिरुनारायणैय्यंगार्यप्रभृतिभ्यो महावैयाकरणेभ्य आचार्येभ्य आपञ्चषवर्षं पाणिनीयं समहाभाष्यं व्याकरण-शास्त्रं यथासम्प्रदायमध्यगीष्ट । प्रायः खल्वाचार्या अपि कुशलमतीनन्ते-वासिनस्सपृच्छापृच्छं सकुतुकमध्यापयन्ति । तथापि तेषां मन्दबुद्धिषु न पक्षपातः । प्रकृते कुशलमतिरयं रङ्गनाथो युवा शीघ्रं विद्वत्पदवीमारूढः । ततः स्वयमलङ्कारशास्त्रमप्यधिजगे । तथापि न हि क्षीणा तस्य पिपठिषा । सूर्यकिरणैर्विलीयमानहिमखण्डैः प्रतिक्षणमेधमानप्रवाहा भागीरथीव रङ्गनाथशर्मणो विविदिषा व्यजृम्भत । ततश्चन्नपुरीय (Madras) कन्नड विद्वत्परीक्षां महीशूरकन्नडपण्डितपरीक्षां च स्वव्यासङ्गेन समुत्ततार । एवं कर्णाटकभाषायामपि गभीरं पाण्डित्यमाससाद ।

प्रत्यहमुषःकाले शयनादुत्थानम्, शुचित्वम्, अध्ययननिष्ठा, मित-भाषित्वम्, सौजन्यम्, परिकरस्वच्छता, धीरप्रकृतित्वम्, अपरोपतापिता, परोपकृतिः इत्यादयो गुणाः अस्मिन् खलेकपोतन्यायेन सम्मिलिता आसन् । अत्यैच्चैवं तस्य विद्यार्थिदशा ।

ततश्चायं विद्याविनयसौजन्यादिभिस्सज्जनस्पृहणीयो वयोरूपसम्पदा पतिंवराभिः कन्याभिर्वरणीयः सद्यो गुरुकुलान्निवृत्तः स्नातको गार्हस्थ्य-मभिलषन् यथाशास्त्रं स्वानुरूपान् दारान् पर्यग्रहीष्ट । अनन्तरं जीविका-हेतोः विद्यावदातयशाः महाशयोऽयं भगवतश्चन्नकेशवस्वामिनः कृपाकटाक्षै-राकारित इव वेलापुरीमाजगाम (Belur) । तत्र पाठशालायां सरसकवीनां वैयाकरणानां विदुषां गुणीत्युपाह्व श्रीगणपतिशास्त्रिणामध्यक्षमहोदयानां

साह्येन कञ्चित्कालं गैर्वाण्या अध्यापकत्वमभजत। ततश्चानेन प्रौढशालायां कर्णाटकसरस्वत्याः पर्युपासनमिवोपाध्यायवृत्तिरभ्रियत। कञ्चित्कालं तत्र स्थित्वा महामना एष तनयप्रवासमसहमानया जनन्येव किञ्चित्कर्णे जपित्वा पुनराकारित इव कल्याणनगर्याम् श्रीमच्चामराजेन्द्रसंस्कृत-महापाठशालां तां नाभिगृहमिव प्रत्याजगाम। स्वीचकाराचार्यकं व्याकरण-शास्त्रे। प्राचार्यस्यास्य प्रज्ञा त्वसाधारणी। अन्यादृशी त्वध्यापनपरिपाटी। अनेनाध्यापिता विद्यार्थिनः न क्वाप्यनुत्तीर्णाः। अन्यत् व्याख्यानकौशलम्। असदृशं शिष्येषु वात्सल्यम्। अनन्यसाधारणं वैदग्ध्यम्। रसिकरोचकं कवित्वम्। अपरिमितो विचारसंग्रहकोशः।

इदं तावल्लोके दृष्टचरम् यदन्येषु केषुचित् विद्वत्सु वैदुष्यं पर्याप्तम्। न ह्यध्यापनकौशलम्। इतरेषु केषुचित् बोधनकौशलमात्रम्। न वैदुष्य-मिति। परन्तु प्राचार्ये रङ्गनाथशर्मण्यमुष्मिंस्तदुभयमप्येकलतावलम्बि—फलद्वयवत् श्लिष्टमित्यहो सौभाग्यम्!

"श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव॥

इति युक्तरूपं हि कविकुलशिरोमणेः कालिदासस्यैतद्वचनम्।

आबालपण्डितपामरजनरोचको ह्यस्य लेखनप्रपञ्चः। कति वा बालो-पयोगीनि संस्कृतभाषामयानि सरलसरलानि पुस्तकान्यनेन न रचितानि? के वा नाशृण्वन् पण्डितसभास्वेतस्य महाविदुषः पाणिन्युपज्ञपदशास्त्रसूत्र-व्याख्यानवैखरीम्? प्रतिवादिभयङ्करेण वैयाकरणेन श्रीमता रङ्गनाथशर्मणा निरूप्यमाणां पूर्वपक्षनिराकरणचणां सिद्धान्तोपपादिकां प्रक्रियां श्रुत्वा, कया वा विपक्षश्रेण्या स्वपराजयशङ्कया मौनमुद्रा नाद्रियत? वेदान्तशास्त्रेऽप्यस्य परिश्रमो महान्। अध्यापिपच्चायं बहून् विद्यार्थिनो वेदान्तशास्त्रम्। भगवद्गीतायामुपनिषत्सु चाध्यात्मतत्त्वानि हृदयङ्गममुपन्यास्थच्च। अपि

चेतो द्वित्राब्देभ्यः पूर्वमयममेरिकादेशेषु (U.S.A.) बहुषु विद्यास्थानेषु भारतीयसंस्कृतेर्महत्त्वमपि प्रत्यपीपदत् । अधुनातनेभ्यः कविभ्यः काव्य-निर्माणकर्मणि महाभागेनानेन कृतं प्रशंसास्पदं मार्गदर्शनम् । कति वा क्षोद-क्षमं विमृष्टा दुरूहाः शास्त्रविचाराः ! इतः सप्ताष्टवत्सरेभ्यः पूर्वं चलच्चित्र-संस्थया प्रप्रथमतया निर्मितस्य भारतप्रशासनेन स्वर्णकमलप्रशस्तिमुपगतस्य, संस्कृतभाषामयस्याद्यशङ्कराचार्य इति रूपकस्य कथासङ्घटनाचातुरी श्रीमतो रङ्गनाथशर्मणः तत्रभवतः प्रतिभोट्टङ्कितेति रसिकसमाजो जानात्येव ।

काव्येषु माधुर्यमनोहरेषु कुर्यादखिन्नः श्रवणाभियोगम् ।
गीतेषु गाथास्वथ देशभाषाकाव्येषु दद्यात्सरसेषु कर्णम् ॥

इति कविकण्ठाभरणे क्षेमेन्द्रकृतमुपदेशमाददानस्येव श्रीमतो रङ्गनाथशर्मणः संस्कृतकर्णाटकोभयकाव्यमीमासायां महती श्रद्धा संजातेति मन्ये । यथा गैर्वाण्यां तथा कार्णाटिक्यामनेन कृतं सारस्वताराधनमन्यादृशम् ।

कति वा सहृदयधुरीणा नास्वदन्त ? यदेतेन महाशयेन कन्नडभाषया स्वाकूतप्रकाशनपूर्वकं स्वनूदितस्य श्रीमद्रामायणस्य वा विष्णुपुराणस्य वा भागवते द्वादशस्कन्धस्य वा वाङ्माधुर्यम् । किञ्च के वा विद्वांसो नादद्रिरे ? विद्वन्मणिनामुना संशोधितस्य पम्पकवेरादिपुराणस्य वा काव्यलाक्षणिकेन कुन्तकेन प्रणीतस्य वक्रोक्तिजीवितस्य वा ग्रन्थस्य परिष्कृतं समग्रं स्वरूपम् । अपि चैतेन दृश्यकाव्यरचनानिपुणेन श्रीमता रङ्गनाथशर्मणा पुनरेतेषु दिवसेषु रचिते बाहुबलिविजयैकचक्राभिधे रूपके विद्यार्थिनो रङ्गभूम्यां साध्वभिनीय रसिकान् सन्तोषयन्तीति हि प्रत्यक्षम् ।

अतः एतस्य सर्वतोमुखं वैदुष्यमुपलक्ष्य, विद्याभिमानिनो महाजना मठाधिपतयश्चैनं सममानयन् । 'विद्यावारिधिः' 'व्याकरणशास्त्रप्रवीण' इत्या-द्युपाधिना पुरश्चक्रुश्च ।

किञ्च विद्यावारिधे रङ्गनाथशर्मणः साहित्यसेवामन्यादृशीं प्रशस्य भारतराजकीयप्रशासनं राष्ट्रियामुपदां प्रशस्तिं चामुष्मै दत्त्वा समभावयत् ।

न केवलमस्य शेमुषी पाणिनीये, वेदान्ते, साहित्ये च प्रगल्भते, अपि तु स्वकौटुम्बव्यवहारेऽपि । विद्यया, विनयेन, सौशील्येन च भूषिताभ्यां, परिणीताभ्यां दुहितृभ्यां, कृतदारपरिग्रहाभ्यां पुत्राभ्यां च सहितस्य जानकीकृपेत्यन्वर्थाभिधाने स्वकीये सुसद्मनि सुखिनः सुकुटुम्बिनोऽस्य रङ्गनाथशर्मणः स्वानुरूपा कमलाक्षीनाम्नी कौसलेयस्य वैदेहीव बभूव ।

परमनेन सहृद्हस्थेन यावदनूद्य रामायणीयस्सीतापरित्यागकथान्तो भागः समाप्तिं नीतस्तावद्दैवेनोपनीयमानः पत्नीवियोगजन्मा दुस्सहः शोकोऽन्वभावि । तदानीं शोकाकुलितचेतसो वाल्मीकेरादिकवेरिव सुगृहीतनाम्नः सहृदयस्य रङ्गनाथशर्मणो मुखात्काचिच्छन्दोमयी वाणी निस्ससार । यथा—

"कमलाक्षी च मे पत्नी भर्तारमनुरुन्धती ।
अरुन्धतीव कल्याणी कमलाक्षपदं गता ॥"

तदनु जातनिर्वेदस्य भगवति निबद्धभावस्य धीरप्रकृतेरस्य मनःपरिपाकदशां सुधियो विदांकुर्वन्तु तदीयया छन्दोनिबद्धया अनया वाण्या यथा—

या लब्धा भूमिजातारमणकरुणया संस्कृता पाणिनीता
या भावस्निग्धरम्योचितविशदपदस्रग्धरा साधुवृत्ता ।
याऽजस्रं श्रोत्रपेयामृतरसनिचितं रामनामान्वजापीत्
तां वाणीं तां च पत्नीं हरिपदयुगले निक्षिपन्निर्वृतोऽस्मि ॥

(पाणिनिना+इता, पाणिना+नीता)

उत्तरकाण्डादुद्धृतं ग्रन्थकारस्य ।

तथैव वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥

—उत्तरकाण्ड।

एतत्सुभाषितस्यार्थः सत्यापितः खलु सज्जनस्यास्य चरितेन ।

सम्प्रति तावत्संप्रतीतः श्रीमान् अयं परिणतवयाः शिथिलाङ्गयष्टिरपि, मन्ददृष्टिरपि वार्धक्यसहजेन रोगेण पीडितोऽप्युत्थातुमशक्तोऽपि, ग्रन्थविमर्शने प्रबन्धलेखने, पुस्तकपठने, काव्यसंशोधने,सहृदयगोष्ठ्यां, गृहागतसज्जनैः सह सँल्लापने च तरुणायत इति तु नातिशयोक्तिः ।

अविकत्थनप्रकृतेर्मितभाषिणः पण्डितावतंसस्यास्य सौहार्दं रत्नाभरणमिवामूल्यम् । अथवा यदि स्यात्तदर्घस्तं मापयितुं भावुकमन्तरा को वाऽन्यः साहसिकः पुरुषः प्रभवेत् । अमूल्या हि सज्जनमैत्री ।

चिरकालादभिनन्दनीयस्यैतस्य रङ्गनाथशर्मणो वैदुष्यसौजन्यादिना समाकृष्टचेता अभूदयं जनः । ततः प्रभृति निरूढः तदीयः स्नेहानुबन्धः । स एवाद्य विद्यावारिधेरेतस्य सच्चरितानुवर्णननौकासञ्चारे कर्णधारायत इत्यत्र नास्ति संशयलेशः ।

भोः सहृदयाः ! मया तावदेतावता वाक्यजातेन मित्रमणेरमुष्य वृत्तान्तः स्थालीपुलाकन्यायेन यथामत्युपवर्णितः । परं त्वस्य वैदुष्यविषये तदीयग्रन्थोदाहरणादि विस्तरभिया न प्रादर्शि ।

विद्वदभिनन्दनं हि शास्त्रसम्मतः सम्प्रदायः । भारतीयसंस्कृतेरयमुत्तेजकः । अयं सम्प्रदायः भारतीयैरस्माभिरवश्यमनुष्ठातव्यः । प्रशंसावहस्तावदधुना रङ्गनाथशर्मणः अभिनन्दनसमित्या क्रियमाणोऽयं कार्यविशेषः ।

किञ्चिदिवात्र मह्यं लेखनीं व्यापारयितुमभिनन्दनसमित्या सम्मतिप्रदानेनोपकृतम् । अतः कृतज्ञोऽयं जनः । सुगृहीतनामा सुधीन्द्रस्सोऽयं रङ्गनाथशर्मा पुरुषायुषं जीयादित्याशंसन्, कर्मेदं भगवते समर्प्य, विरमत्ययं जनः ।

शतृप्रत्ययान्तेषु नुम्व्यवस्था

शतृप्रत्ययान्तानां शब्दानां ङीप्प्रत्यये कृते, के नित्यं नुमं प्राप्नुवन्ति, के भजन्ति च विकल्पेन, के च न सर्वथा लभन्ते इति समुत्पन्ने संशये, अज्ञाते च परिनिष्ठितशब्दस्वरूपे, समुदिते च भये, अपशब्दं मा प्रयुङ्क्त प्राज्ञलोकः इति मनीषया, संशयान्धतमसस्य अम्बरमणिं, लक्षणैकचक्षुष्काणां चक्षुः, निश्चितज्ञानजनने अनितरसाधारणं कारणं, भ्रान्तिज्ञानपरिपन्थिनः शस्त्रं, शास्त्रमनुरुध्य नुम्विषयं परिशीलयितुं आत्मानं व्यापारयत्ययं जनः ।

उपलभ्यन्ते हि धातुगणे कथिताः धातवस्तावत् आहत्य [१९४३] त्रिचत्वारिंशदुत्तरनवदशशतम् । तांश्च अन्वाख्यानाय भगवान् पाणिनिः दशधा खलु विबभाज । दशभिः प्रकारैः विभक्तान् तानेव गणत्वेन व्यवहरति वैयाकरणकुलम् । सकलानामपि धातूनाम् अन्वाख्यानाय अवलम्बितोऽयं पन्थाः आचार्येणेति सर्वेष्वपि गणेषु धातूनां न समानसङ्ख्यया पदं न्यधायि । प्रथमगणः एव दशोत्तरसहस्रेण धातुभिराक्रम्यत [१०१०] । अस्थायि च धातूनां दशोत्तरचतुःशत्या [४१०] दशमे गणे । इत्थञ्च उपद्विसहस्रधातुषु चतुर्दशशतं धातवः गणयुगलं आक्रान्तवन्तः । अवशिष्टानां अल्पीयसां धातूनां समूहः एवं व्यभाजि— द्वितीयगणे द्विसप्ततिधातवः (७२), तृतीयगणे चतुर्विंशतिधातवः (२४), चतुर्थगणे चत्वारिंशदुत्तरशतं (१४०), पञ्चमगणे चतुस्त्रिंशत् (३४), षष्ठगणे सप्तपञ्चाशदुत्तरशतम् (१५७), सप्तमगणे पञ्चविंशतिः (२५), अष्टमगणे दश (१०), नवमगणे एकषष्टिश्चेति (६१) ।

एषु च केचित् आत्मनेपदसंज्ञाभाजः, अपरे च परस्मैपदनामयुञ्जः, इतरे च एतदुभयसंज्ञावहाः सन्ति । तत्र परस्मैपदिनः केवलं 'लटः शतृशानचावप्रथमासमानाधिकरणे' [पा. सू. ३-२-१२४] इत्यनुशासनेन

विधीयमानं शतरं लभन्ते। 'लः परस्मैपदम्' [पा.सू.१-४-९९] इति सूत्रं 'शेषात्कर्तरि परस्मैपदम्' [पा.सू.१-३-७८]इति सूत्रं च तत्र प्रमाणम्।

शतृप्रत्ययार्हाणां धातूनां समुत्पन्ने शतरि कृते च ङीप्प्रत्यये नुमर्हाः धातवः के इति समुत्पन्नं संशयम् इदं लक्षणयुग्मं परिमार्ष्टि। तयोः प्राथमिकं सूत्रं 'आच्छीनद्योर्नुम्' इति। [पा.सू.७-१-८०](अवर्णान्तादङ्गात् परो यः शतुरवयवः तदन्तस्याङ्गस्य नुम् वा स्यात् शीनद्योः परतः।) द्वैतीयीकन्तु 'शप्श्यनोर्नित्यम्' इति । [पा. सू. ७-१-८१] (शप्श्यनोरात्परतः यः शतुरवयवः तदन्तस्य नित्यं नुम् स्यात् शीनद्योः परतः।)

इदमत्र विभावनीयं अकारान्तादङ्गात् परः शतृप्रत्ययस्य अवयव एव नुमं विन्दति नान्यः। तत्र शप्श्यनोर्नित्यमित्याह। तस्मात् प्रथमगणं प्रविष्टाः, चतुर्थगणे स्थिताः, दशमगणे वर्तमानाश्च सर्वे लब्धशतृ-प्रत्ययाः धातवः स्त्रियां नित्यमेव नुममधिगच्छन्ति। यथा पठन्ती, दीव्यन्ती, चोरयन्तीति। षष्ठे गणे लब्धपदाः परस्मैभाषिणः सर्वेऽपि यदि शतरं संप्राप्य ङीप्प्रत्ययं विन्दन्ति तर्हि विकल्पेन नुमं प्राप्नुवन्ति। भजन्ति हि तौदादिकाः सर्वे 'श' विकरणमिति एषां सर्वेषां सिद्धमकारान्ताङ्गत्वम्। अतः 'आच्छीनद्योर्नुम्' इति योगेन विधीयमानस्य वैकल्पिकस्य नुमः अवसरः। यथा तुदती-तुदन्तीति। अदादिगणे सन्ति स्वयमाकारान्ताः चतुर्दश धातवः। तेषु एकमपहाय अपरे त्रयोदश धातवः नुममालिङ्गन्ति। यथा याती-यान्तीति। दरिद्रा धातुः आकारान्तः सन्नपि 'श्नाभ्यस्तयोरातः' [पा.सू.६-४-११२]इति आकारलोपरूपदुर्गत्या आकारान्ताङ्गस्य दारिद्र्य-मनुभवन् नुमश्चुम्बनेऽसमर्थः स्वनाम्नः अन्वर्थतामाससाद। अतः 'दरिद्रती' इति एकमेव रूपम्। त्रयोदश धातून् परिहाय द्वितीयगणीयाः, तृतीयगणे लब्धस्थानाः, पञ्चमगणं प्रविष्टाः, सप्तमगणभाजः, अष्टमगणे विराजमानाः, नवमगणे शोभमानाश्च शतृप्रत्ययार्हाः धातवः स्त्रियां नुमा विरहिताः तिष्ठन्ति। पूर्वोक्तगणपठितानां धातूनां अन्यतमोऽपि शतरि कृते अकारान्तमङ्गं

न भजति इति अकारान्तरूपाङ्गाभावेन नुमालिङ्गने असमर्थाः सन्तः, नुमो विरहमनुभवन्त एव इमे वराकास्तिष्ठन्ति। यथा क्रमशः उदाहरणानि—द्वितीयगणे अदती, तृतीयगणे दधती, पञ्चमगणे चिन्वती, सप्तमगणे भिन्दती, अष्टमगणे कुर्वती, नवमगणे क्रीणती इति च।

अयमत्र विशेषः, सर्वेऽपि शतृप्रत्ययार्हाः धातवः णिजन्ते सन्नन्ते च स्त्रियां नित्यमेव नुमं प्राप्नुवन्ति। किं बहुना 'दरिद्रा' धातुरपि नित्यमेव नुमं लभते। अपि च 'लृटः सद्वा' [पा.सू. ३-३-१४] इत्यनेन यदा भविष्यति शता क्रियते तदापि स्त्रियां सर्वेऽपि विकल्पेन नुमं प्राप्नुवन्ति यथा करिष्यती-करिष्यन्ती।

अयञ्च उपसंहारः—प्रथमे, चतुर्थे, दशमे च गणे विद्यमानाः सर्वेऽपि नित्यमेव नुमं लभन्ते। षष्ठगणे स्थिताः सर्वेऽपि, द्वितीयगणे पठिताश्च आकारान्तास्त्रयोदश धातवः विकल्पेन नुमं विन्दन्ति। त्रयोदश धातूनन्तरा द्वितीये, तृतीये, पञ्चमे, सप्तमे, अष्टमे, नवमे च प्रविष्टाः धातवः न स्वप्नेऽपि नुमो मुखदर्शनं कुर्वन्ति। परं णिजन्ते, सन्नन्ते च सर्वेऽपि धातवः नुमालिङ्गनसुखमनुभवन्ति भविष्यति च शतरि सर्वेऽपि विकल्पेन नुमं लभन्ते। प्रथमगणे प्रविष्टावपि 'धिवि, कृवि' धातू न नुमं विन्दतः। 'धिन्विकृण्व्योर च' [पा. सू. ३ १-८०] इति 'उ' विकरणस्य विधानात्।

इदञ्च समाहितेन मनसा श्रोतव्यम्—द्विषन्ती, स्तुवन्ती, ब्रुवन्ती बिभ्रन्ती, दधन्ती, चिन्वन्ती, वृण्वन्ती, शक्नुवन्ती, भिन्दन्ती, छिन्दन्ती, युञ्जन्ती, तन्वन्ती, कुर्वन्ती, क्रीणन्ती, जानन्ती, क्लिश्नन्ती, पुष्णन्ती, गृह्णन्ती, पठती, नृत्यती, आश्लिष्यती, द्रुह्यती, चोरयती, क्षालयती, मानयती, इत्येते सर्वेऽपि साधुशब्दाः इव प्रतीयन्ते। परमेते सर्वेऽपि अपाणिनीया एव। अर्थादपशब्दाः। अतः एतादृशे विषये लक्षणैक-शरणैरस्माभिः व्याकरणमेव आदरणीयं भवतीति शम्।